श्रीमदप्पय्यदीक्षितविरचितः

# शास्त्रसिद्धान्तलेशसङ्ग्रहः



सम्पादकः

डा.दयानन्दपाणिग्राही

श्रीमदप्पय्यदीक्षितविरचितः

शास्त्रसिद्धान्तलेशसङ्ग्रहः

सम्पादकः

डा.दयानन्दपाणिग्राही

© **Editor**

**ISBN :**

संस्करणम्  : प्रथमम्

वर्षम् : 2020

मूल्यम् : **90**

प्रकाशकः

अमर ग्रन्थ पब्लिकेशन्स

8/25 विजय नगर,

दिल्ली - 110009

## श्रीमदप्पय्यदीक्षितविरचितः शास्त्रसिद्धान्तलेशसङ्ग्रहः

(प्रथम-सत्रार्द्धः)

### प्रथमपरिच्छेदः

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा

सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता ।

जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता

जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥१॥

प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं

सन्नह्यद्भिरनादरात् सरणयो नानाविधा दर्शिताः ।

तन्मूलानिह सङ्ग्रहेण कतिचित् सिद्धान्तभेदान् धिय-

श्शुद्ध्यै सङ्कलयामि तातचरणव्याख्यावचःख्यापितान् ॥२॥

तेषूपपादनापेक्षान् पक्षान् प्रायो यथामति ।

युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरम् ॥३॥

**श्रवणविधिविचारः**

तत्र तावत् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो (मन्तव्यः)' (बृ.उ. २ । ४ । ५) इति अधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्ने ब्रह्मात्मनि समुदितजिज्ञासस्य तज्ज्ञानाय वेदान्तश्रवणे विधिः प्रतीयमानः किंविध इति चिन्त्यते ।

तिस्रः खलु विधेर्विधाः – अपूर्वविधिः नियमविधिः परिसङ्ख्याविधिश्च इति । तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिराद्यः । यथा 'व्रीहीन् प्रोक्षति' इति । नात्र व्रीहीणां प्रोक्षणस्य संस्कारकर्मणो विना विनियोगं मानान्तरेण कथमपि प्राप्तिरस्ति । पक्षप्राप्तस्य अप्राप्तांशपरिपूरणफलको विधिर्द्वितीयः । यथा 'व्रीहीनवहन्ति' इति । अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेव अवहननप्राप्तिः भविष्यति इति न तत्प्राप्त्यर्थोऽयं विधिः, किन्तु आक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषात् नखविदलनादिरपि पक्षे प्राप्नुयात् इति अवहननाप्राप्तांशसद्भावात् तदंशपरिपूरणफलकः । द्वयोः शेषिणोः एकस्य शेषस्य वा एकस्मिन् शेषिणि द्वयोः शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिः तृतीयः । यथा अग्निचयने

'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति, यथा वा चातुर्मास्यान्तर्गतेष्टिविशेषे गृहमेधीये 'आज्यभागौ यजति' इति । अग्निचयने अश्वरशनाग्रहणं गर्दभरशनाग्रहणं च इति द्वयमनुष्ठेयम् । तत्र अश्वरशनाग्रहणे 'इमामगृभ्णन्' इति मन्त्रो लिङ्गादेव रशनाग्रहणप्रकाशनसामर्थ्यरूपात् नित्यं प्राप्नोति इति न तत्प्राप्त्यर्थः तदप्राप्तांशपरिपूरणार्थो वा विधिः, किं तु लिङ्गाविशेषात् गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयात् इति तन्निवृत्त्यर्थः । तथा गृहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वात् अतिदेशादेव आज्यभागौ नित्यं प्राप्नुतः इति न तत्र विधिः तत्प्राप्त्यर्थः तन्नियमार्थो वा; किं तु अतिदेशात् प्रयाजादिकमपि प्राप्नुयात् इति तन्निवृत्त्यर्थः । गृहमेधीयाधिकरणपूर्वपक्षरीत्या इदमुदाहरणं यत्र क्वचिदुदाहर्तव्यमित्युदाहृतम् । न च नियमविधावपि पक्षप्राप्तावहननस्य अप्राप्तांशपरिपूरणे कृते तदवरुद्धत्वात् पाक्षिकसाधनान्तरस्य नखविदलनादेः निवृत्तिरपि लभ्यत इति इतरनिवृत्तिफलकत्वाविशेषात् नियमपरिसङ्ख्ययोः फलतो विवेको न यक्त इति शङ्क्यम् । विधितोऽवहनननियमं विना आक्षेपलभ्यस्य नखविदलनादेर्निवर्तयितुमशक्यतया अप्राप्तांशपरिपूरणरूपस्य नियमस्य प्राथम्यात् विधेयावहननगतत्वेन प्रत्यासन्नत्वाच्च तस्यैव नियमविधिफलत्वोपगमात् । तदनुनिष्पादिन्या अविधेयगतत्वेन विप्रकृष्टाया इतरनिवृत्तेः सन्निकृष्टफलसम्भवे फलत्वानौचित्यात् ।

एवं विविक्तासु तिसृषु विधासु किंविधः श्रवणविधिराश्रीयते ।

प्रकटार्थकारादयः केचिदाहुः– अपूर्वविधिरयम् । अप्राप्तत्वात् । न हि 'वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुः' इति अन्वयव्यतिरेकप्रमाणमस्ति । लोके कृतश्रवणस्यापि बहुशस्तदनुत्पत्तेः अकृतश्रवणस्यापि गर्भगतस्य वामदेवस्य तदुत्पत्तेः उभयतो व्यभिचारात् । न वा श्रवणमात्रं श्रोतव्यार्थसाक्षात्कारहेतुः इति शास्त्रान्तरश्रवणे गृहीतः सामान्यनियमोऽस्ति, येनात्र विशिष्य हेतुत्वग्राहकाभवेऽपि सामान्यमुखेनैव हेतुत्वं प्राप्यत इत्याशङ्क्येत । गान्धर्वादिशास्त्रश्रवणस्य षड्जादिसाक्षात्कारहेतुत्वाभ्युपगमेऽपि कर्मकाण्डादिश्रवणात् तदर्थधर्मादिसाक्षात्कारादर्शनेन व्यभिचारात् । तस्मादपूर्वविधिरेवायम् ।

भाष्येऽपि 'सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्' (ब्र.सू. ३ । ४ । ४७) इत्यधिकरणे 'विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवत् विधिरेवाश्रयितव्यः अपूर्वत्वात्' इति पाण्डित्यशब्दशब्दिते श्रवणे अपूर्वविधिरेवाङ्गीकृतः – इति ।

वेदान्तश्रवणस्य नित्यापरोक्षब्रह्मसाक्षात्कारहेतुत्वं न अप्राप्तम् , अपरोक्षवस्तुविषयकप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वस्य प्राप्तेः शाब्दापरोक्षवादे व्यवस्थापनात् । तदर्थमेव हि तत्प्रस्तावः । न च - तावता ब्रह्मप्रमाणत्वेन

आपातदर्शनसाधारणब्रह्मसाक्षात्कारहेतुत्वप्राप्तावपि अविद्यानिवृत्त्यर्थमिष्यमाणसत्तानिश्चयरूपतत्साक्षात्कारहेतुत्वं श्रवणस्य न प्राप्तम् इति वाच्यम् । विचारमात्रस्य विचार्यनिर्णयहेतुत्वस्य ब्रह्मप्रमाणस्य तत्साक्षात्कारहेतुत्वस्य च प्राप्तौ विचारितवेदान्तशब्दज्ञानरूपस्य श्रवणस्य तद्धेतुत्वप्राप्तेः । न च उक्तोभयतो व्यभिचारः । सहकारिवैकल्येनान्वयव्यभिचारस्यादोषत्वात् , जातिस्मरस्य जन्मान्तरश्रवणात् , फलसम्भवेन व्यतिरेकव्यभिचाराभावात् । अन्यथा व्यभिचारेणैव हेतुत्वबाधे श्रुत्यापि तत्साधनताज्ञानासम्भवात् । घटसाक्षात्कारे चक्षुरतिरेकेण त्वगिन्द्रियमिव ब्रह्मसाक्षात्कारे श्रवणातिरेकेण उपायान्तरमस्तीति शङ्कायां व्यतिरेकव्यभिचारस्यापि अदोषत्वात् । तथा च प्राप्तत्वान्नापूर्वविधिः ।

अत एव 'आवृत्तिरसकृदुपदेशात्' (ब्र.सू. ४ । १ । १) इत्यधिकरणभाष्ये 'दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमनानि दृष्टार्थानि भवन्ति, यथा अवघातादीनि तण्डुलनिष्पत्तिपर्यवसानानि' इति श्रवणस्य ब्रह्मदर्शनार्थस्य दृष्टार्थतया दार्शपूर्णमासिकावघातन्यायप्राप्तावृत्त्युपदेशः । अपूर्वविधित्वे तु स न सङ्गच्छते सर्वौषधावघातवत् । अग्निचयने 'सर्वौषधस्य पूरयित्वाऽवहन्ति अथैतदुपदधाति ।' इति उपधेयोलूखलसंस्कारार्थत्वेन विहितस्यावघातस्य दृष्टार्थत्वाभावान्नावृत्तिरिति हि तन्त्रलक्षणे स्थितम् (जै.सू. ११ । १ । ६) ।

अतो नियमविधिरेवायम् । तदभावे हि यथा वस्तु किञ्चिचक्षुषा वीक्षमाणस्तत्र स्वागृहीते सूक्ष्मे विशेषान्तरे केनचित् कथिते तदवगमाय तस्यैव चक्षुषः पुनरपि सप्रणिधानं व्यापारे प्रवर्तते । एवं मनसा 'अहं' इति गृह्यमाणे जीवे वेदान्तैरध्ययनगृहीतैरुपदिष्टं निर्विशेषब्रह्मचैतन्यरूपत्वमाकर्ण्य तदवगमाय तत्र सावधानं मनस एव प्रणिधने कदाचित् पुरुषः प्रवर्तेतेति वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यत् । 'यतो वाचो निवर्तन्ते (अप्राप्य मनसा सह)' (तै.उ. २ । ९ । १) इतिश्रुतिः 'मनसैवानुद्रष्टव्यम्' (बृ.उ. ४ । ४ । १९) 'दृश्यते त्वग्र्यया बुद्ध्या' (क.उ. ३ । १२) इत्यपि श्रवणेन अनवहितमनोविषया इतिशङ्कासम्भवात् ।

अथवा 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' (मु.उ. ३ । १ । २) इत्यादिश्रवणात् भिन्नात्मज्ञानान्मुक्तिरितिभ्रमसम्भवेन मुक्तिसाधनज्ञानाय भिन्नात्मविचाररूपे शास्त्रान्तरश्रवणेऽपि पक्षे प्रवृत्तिस्स्यादिति अद्वैतात्मपरवेदान्तश्रवणानियमविधिरयमस्तु । इह आत्मशब्दस्य 'इदं सर्वं यदयमात्मा' (बृ.उ. २ । ४ । ६) इत्यादिप्रकरणपर्यालोचनया अद्वितीयात्मपरत्वात् । न हि वस्तुसत्साधनान्तरप्राप्तावेव नियमविधिरिति कुलधर्मः ; येन वेदान्तश्रवणनियमार्थवत्त्वाय नियमादृष्टजन्यस्वप्रतिबन्धककल्मषनिवृत्तिद्वारा सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्य वेदान्तश्रवणैकसाध्यत्वस्याभ्युपगन्तव्यत्वेन तत्र वस्तुतः साधनान्तराभावान्न नियमविधिर्युज्यत इति शङ्क्येत । किं तु यत्र

साधनान्तरतया सम्भाव्यमानस्य पक्षे प्राप्त्या विधित्सितसाधनस्य पाक्षिक्यप्रप्तिर्निवारयितुं न शक्यते तत्र नियमविधिः, तावतैव अप्राप्तांशपरिपूरणस्य तत्फलस्य सिद्धेः ।

अथवा - गुरुमुखाधीनादिव निपुणस्य स्वप्रयत्नमात्रसाध्यादपि वेदान्तविचारात् सम्भवति सत्तानिश्चयरूपं ब्रह्मापरोक्षज्ञानम् । किं तु गुरुमुखाधीतवेदान्तवाक्यश्रवणनियमादृष्टम् अविद्यानिवृत्तिं प्रति कल्मषनिरासेनोपयुज्यत इति तदभावेन प्रतिबद्धम् अविद्यामनिवर्तयत् परोक्षज्ञानकल्पमवतिष्ठते । न च ज्ञानोदये अज्ञानानिवृत्त्यनुपपत्तिः । प्रतिबन्धकाभावस्य सर्वत्रापेक्षिततत्वेन सत्यपि प्रत्यक्षविशेषदर्शने उपाधिना प्रतिबन्धात् प्रतिबिम्बभ्रमानिवृत्तिवत् तदनिवृत्त्युपपत्तेः । एवं च लिखितपाठादिनापि स्वाध्यायग्रहणप्रसक्तौ गुरुमुखाधीनाध्ययननियमविधिवत् स्वप्रयत्नमात्रपूर्वकस्यापि वेदन्तविचारस्य सत्तानिश्चयरूपब्रह्मसाक्षात्कारार्थत्वेन पक्षे प्राप्तौ गुरुमुखाधीनश्रवणनियमविधिरस्तु । न च 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' (मु.उ. १ । २ । १२) इति गुरूपसदनविधिनैव गुरुरहितविचारव्यावृत्तिसिद्धेर्विफलो नियमविधिरिति शङ्क्यम् । गुरूपसदनस्य श्रवणाङ्गतया श्रवणविध्यभावे तद्विधिरेव नास्तीति तेन तस्य वैफल्याप्रसक्तेः । अन्यथा अध्ययनाङ्गभूतोपगमनविधिनैव लिखितपाठादिव्यावृत्तिरिति अध्ययननियमोऽपि विफलः स्यात् ।

अथवा अद्वैतात्मपरभाषाप्रबन्धश्रवणस्य पक्षे प्राप्त्या वेदान्तश्रवणे नियमविधिरस्तु । न च 'नम्लेच्छितवै' इत्यादिनिषेधादेव तदप्राप्तिः । शास्त्रव्युत्पत्तिमान्द्यात् वेदान्तश्रवणमशक्यमिति पुरुषार्थनिषेधमुल्लङ्घ्यापि भाषाप्रबन्धेनाद्वैतं जिज्ञासमानस्य तत्र प्रवृत्तिसम्भवेन नियमविधेरर्थवत्त्वोपपत्तेः । 'अभ्युपगम्यते हि कत्रधिकरणे' (जै.सू. ३ । ४ । १२) व्युत्पादितं पुरुषार्थे अनृतवदननिषेधे सत्यपि दर्शपूर्णमासमध्ये कुतश्चिद्धेतोरङ्गीकृतनिषेधोल्लङ्घनस्य अविकलां क्रतुसिद्धिं कामयमानस्य अनृतवदने प्रवृत्तिः स्यदिति पुनः क्रत्वर्थतया दर्शपूर्णमासप्रकरणे 'नानृतं वदेत्' इति निषेधः इति क्रत्वर्थतया निषेधस्यार्थवत्वम् ।

यद्वा - यथा 'मन्त्रैरेव मन्त्रार्थस्मृतिः साध्या' इति नियमः , तन्मूलककल्पसूत्रात्मीयग्रहणकवाक्यादीनामपि पक्षे प्राप्तेः ; तथा वेदान्तमूलकेतिहासपुराणपौरुषेयप्रबन्धानामपि पक्षे प्राप्तिसम्भवान्नियमोऽयमस्तु । सर्वथा नियमविधिरेवायम् । 'सहकार्यन्तरविधिः' इत्यधिकरणभाष्ये अपूर्वत्वोक्तिस्तु नियमविधित्वेऽपि पाक्षिकाप्राप्तिसद्भावात् तदभिप्राया इति तत्रैव पक्षेणेति पाक्षिकाप्राप्तिकथनपरसूत्रपदयोजनेन स्पष्टीकृतम् - इति विवरणानुसारिणः ॥

कृतश्रवणस्य प्रथमं शब्दात् निर्विचिकित्सं परोक्षज्ञानमेवोत्पद्यते । शब्दस्य परोक्षज्ञानजननस्वाभाव्येन क्लृप्तसामर्थ्यानतिलङ्घनात् । पश्चात् कृतमनननिदिध्यासनस्य सहकारिविशेषसम्पन्नात् तत एव अपरोक्षज्ञानं जायते ।

तत्तांशगोचरज्ञानजननासमर्थस्यापीन्द्रियस्य सत्समर्थसंस्कारसाहित्यात् प्रत्यभिज्ञानजनकत्ववत् स्वतोऽपरोक्षज्ञानजननासमर्थस्यापि शब्दस्य विधुरपरिभावितकामिनीसाक्षात्कारस्थले तत्समर्थत्वेनक्लृप्तभावनाप्रचयसाहित्यादपरोक्षज्ञानजनकत्वं युक्तम् । ततश्च शब्दस्य स्वतस्स्वविषये परोक्षज्ञानजनकत्वस्य भावनाप्रचयसहकृतज्ञानकरणत्वावच्छेदेन विधुरान्तःकरणवदपरोक्षज्ञानजनकत्वस्य च प्राप्तत्वात् पूर्ववन्नियमविधिरिति तदेकदेशिनः ।

वेदान्तश्रवणेन न ब्रह्मसाक्षात्कारः, किन्तु मनसैव , 'मनसैवानुद्रष्टव्यम्' (बृ.उ. ४ । ४ । १९) इति श्रुतेः । 'शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्' इति गीताभाष्यवचनाच्च । श्रवणं तु निर्विचिकित्सपरोक्षज्ञानार्थमिति तादर्थ्येनैव नियमविधिः इति केचित् ।

अपरोक्षज्ञानार्थत्वेनैव श्रवणे नियमविधिः । 'द्रष्टव्य' इति फलकीर्तनात् । तादर्थ्यञ्च तस्य करणभूतमनःसहकारितयैव न साक्षात् । शाब्दापरोक्षज्ञानानङ्गीकरणात् । न च तस्य तेन रुपेण तादर्थ्यं न प्राप्तमित्यपूर्वविधित्वप्रसङ्गः । श्रावणेषु षड्जादिषु समारोपितपरस्पराविवेकनिवृत्त्यर्थगान्धर्वशास्त्रश्रवणसहकृतश्रोत्रेण परस्परासङ्कीर्णतद्याथार्थ्यापरोक्ष्यदर्शनेन, प्रकाशमाने वस्तुनि आरोपिताविवेकनिवृत्त्यर्थशास्त्रसद्भावे तच्छ्रवणं तत्साक्षात्कारजनकेन्द्रियसहकारिभावेनोपयुज्यत इत्यस्य क्लृप्तत्वात् इति अपरे ।

वेदान्तवाक्यानाम् अद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलन्यायविचारात्मकचेतोवृत्तिविशेषरूपस्य श्रवणस्य न ब्रह्मणि परोक्षमपरोक्षं वा ज्ञानं फलम् , तस्य शब्दादिप्रमाणफलत्वात् । न च उक्तरूपविचारावधारिततात्पर्यविशिष्टशब्दज्ञानमेव श्रवणमस्तु तस्य ब्रह्मज्ञानं फलम् युज्यते इति वाच्यम् , ज्ञाने विध्यनुपपत्तेः ।श्रवणविधेर्विचारकर्तव्यताविधायकजिज्ञासासूत्रमूलत्वोपगमाच्च । ऊहापोहात्मकमानसक्रियारूपविचारस्यैव श्रवणत्वौचित्यात् । न च विचारस्यैव तात्पर्यनिर्णयद्वारा तज्जन्यतात्पर्यभ्रमादिपुरुषापराधरूपप्रतिबन्धकविगमद्वारा वा ब्रह्मज्ञानं फलमस्त्विति वाच्यम् । तात्पर्यज्ञानस्य शाब्दज्ञाने कारणत्वानुपगमात् कार्ये क्वचिदपि प्रतिबन्धकाभावस्य कारणत्वानुपगमाच्च तयोर्द्वारत्वानुपपत्तेः । ब्रह्मज्ञानस्य विचाररूपातिरिक्तकारणकत्वे तत्प्रामाण्यस्य परतस्त्वापत्तेश्च । तस्मात् तात्पर्यनिर्णयद्वरा परुषापराधनिरासार्थत्वेनैव विचाररूपे श्रवणे नियमविधिः । 'द्रष्टव्यः' इति तु दर्शनार्हत्वेन स्तुतिमात्रं न श्रवणफलसङ्कीर्तनम् इति सङ्क्षेपशारीरकानुसारिणः ।

ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकसुश्रुतादिश्रवणे प्रवृत्तस्येव मध्ये व्यापारान्तरेऽपि प्रवृत्तिः प्रसज्येत इति तन्निवृत्तिफलकः 'श्रोतव्यः' इति परिसङ्ख्याविधिः । 'ब्रह्मसंस्थोऽमृतत्वमेति' (छा.उ. २ । २३ । १) इति छान्दोग्ये अनन्यव्यापारत्वस्य मुक्त्युपायत्वावधारणात् , सम्पूर्वस्य तिष्ठतेः समाप्तिवाचितया ब्रह्मसंस्थाशब्दशब्दिताया ब्रह्मणि समाप्तेः अनन्यव्यापाररूपत्वात् । 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' (मु.उ. २ । २ । ५) इत्याथर्वणे कण्ठत एव व्यापारान्तरप्रतिषेधाच्च , 'आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया' इत्यादिस्मृतेश्च । न च ब्रह्मज्ञानानुपयोगिनो व्यापारान्तरस्य एकस्मिन् साध्ये श्रवणेन सह समुच्चित्य प्राप्त्यभावात् न तन्निवृत्त्यर्थः परिसङ्ख्याविधिर्युज्यत इति वाच्यम् । 'सहकार्यन्तरविधिः' (ब्र.सू. ३ । ४ । ४७) इत्यादिसूत्रे 'यस्मात् पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मान्नियमविधिः' इति तद्भाष्ये च कृतश्रवणस्य शाब्दज्ञानमात्रात् कृतकृत्यतां मन्वानस्य अविद्यानिवर्तकसाक्षात्कारोपयोगिनि निदिध्यासने प्रवृत्तिर्न स्यादिति अतत्साधनपक्षप्राप्तिमात्रेण निदिध्यासने नियमविधेरभ्युपगततया तन्न्यायेन असाधनस्य समुच्चित्य प्राप्तावपि तन्निवृत्तिफलकस्य परिसङ्ख्याविधेः सम्भवादिति । 'नियमः परिसङ्ख्या वा विध्यर्थोऽत्र भवेत् , यतः । अनात्मादर्शनेनैव परात्मानमुपास्महे ॥' (नै.सि. १ । ८८) इति वर्तिकवचनानुसारिणः किंचित् आहुः ॥

'आत्मा श्रोतव्यः' इति मननादिवत् आत्मविषयकत्वेन निबध्यमानं श्रवणम् आगमाचार्योपदेशजन्यमात्मविषयं ज्ञानमेव न तात्पर्यविचाररूपम् इति न तत्र कोऽपि विधिः । अत एव समन्वयसूत्रे (ब्र.सू. १ । १ । ४) आत्मज्ञानविधिनिराकरणानन्तरं भाष्यं "किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि वचनानि विधिच्छायानि ? स्वभाविकप्रवृत्तिविषयविमुखीकरणार्थनीति ब्रूमः" इत्यादि ।

यदि च वेदान्ततात्पर्यविचारः श्रवणं तदा तस्य तात्पर्यनिर्णयद्वारा वेदान्ततात्पर्यभ्रमसंशयरूपप्रतिबन्धकनिरास एव फलं न प्रतिबन्धकान्तरनिरासो ब्रह्मावगमो वा । तत्फलकत्वं च तस्य लोकत एव प्राप्तम् , साधनान्तरं च किञ्चिद्विकल्प्य समुच्चित्य वा न प्राप्तम् , इति न तत्र विधित्रयस्याप्यवकाशः ।

विचारविध्यभावेऽपि विज्ञानार्थतया विधीयमानं गुरूपसदनं दृष्टद्वारसम्भवे अदृष्टकल्पनायोगात् गुरुमुखाधीनवेदान्तविचारद्वारैव विज्ञानार्थं पर्यवस्यतीति । अत एव स्वप्रयत्नसाध्यविचारव्यावृत्तिः । अध्ययनविध्यभावे तु उपगमनं विधीयमानम् अक्षरावाप्त्यर्थत्वेनाविधीयमानत्वात् न तदर्थं गुरुमुखोच्चारणानुच्चारणमध्ययनं द्वारीकरोतीति लिखितपाठादिव्यावृत्त्यसिद्धेः सफलोऽध्ययननियमविधिः ।

न च तात्पर्यभ्रमादिनिरासाय वेदान्तविचारार्थिनः कदाचित् द्वैतशास्त्रेऽपि प्रवृत्तिः स्यात् , तत्रापि तदभिमतयोजनया वेदान्तविचारसत्त्वात् , इत्यद्वैतात्मपरवेदान्तविचारनियमविधिरर्थवानिति वाच्यम् । स्वयमेव तात्पर्यभ्रमहेतोस्तस्य तन्निरासकत्वाभावेन साधनान्तरप्राप्त्यभावात् । तन्निरासकत्वभ्रमेण तत्रापि कस्यचित् प्रवृत्तिः स्यात् इत्येतावता श्रोतव्य इति नियमविधेरभ्युपगमः इत्यपि न । ईश्वरानुग्रहलब्धाद्वैतश्रद्धारहितस्य श्रोतव्यवाक्येऽपि पराभिमतयोजनया सद्वितीयात्मविचारविधिपरत्वभ्रमसम्भवेन भ्रमप्रयुक्ताया अन्यत्र प्रवृत्तेः विधिशतेनाप्यपरिहार्यत्वात् ।

न च व्यापारान्तरनिवृत्त्यर्था परिसङ्ख्येति वाच्यम् । असन्न्यासिनो व्यापारान्तरनिवृत्तेरशक्यत्वात् , सन्न्यासिनस्तन्निवृत्तः ब्रह्मसंस्थया सह सन्न्यासविधायकेन 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्यन्तरेण सिद्धतया, सन्न्यासविधायकश्रुत्यन्तरमपेक्ष्य श्रोतव्यवाक्येन तस्य व्यापारान्तरनिवृत्त्युपदेशस्य व्यर्थत्वात् ।

न च विचारविध्यसम्भवेऽपि विचारविषयवेदान्तनियमविधिः सम्भवति भाषाप्रबन्धादिव्यावर्त्यसत्त्वात् इति शङ्क्यम् । सन्निधानादेव वेदान्तनियमस्य लब्धत्वेन विधिविषयत्वायोगात् , 'स्वाध्यायोऽध्येतव्यः' इत्यर्थावबोधार्थनियमविधिबलादेव अध्ययनगृहीतवेदोत्पादितं वेदार्थज्ञानं फलपर्यवसायि न कारणान्तरोत्पादितम् इत्यस्यार्थस्य लब्धत्वेन वेदार्थे ब्रह्मणि मोक्षाय ज्ञातव्ये भाषाप्रबन्धादीनामप्राप्तेश्च ।

न च 'सहकार्यन्तरविधिः' इत्यधिकरणे पाण्डित्यबाल्यमौनशब्दितेषु श्रवणमनननिदिध्यासनेषु विधिरभ्युपगत इति वाच्यम् । विचारे विचार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसिद्ध्यनुकूलयुक्त्यनुसन्धानरूपे मनने तत्प्रत्ययाभ्यासरूपे निदिध्यासने च वस्त्ववगमवैशद्यहेतुत्वस्य च लोकसिद्धत्वेन तेषु विध्यनपेक्षणात् । विधिच्छायार्थवादस्येव प्रशंसाद्वारा प्रवृत्त्यतिशयकरत्वमात्रेण तत्र विधित्वव्यवहारात् ।

एवं च श्रवणविध्यभावात् कर्मकाण्डविचारवत् ब्रह्मकाण्डविचारोऽप्यध्ययनविधि मूलः इति आचार्यवाचस्पतिपक्षानुसारिणः ॥

**ब्रह्मलक्षणविचारः**

विचार्यस्य च ब्रह्मणः जगज्जन्मस्थितिलयकारणत्वं लक्षणमुक्तं 'यतो वा इमानि भूतानि जायन्ते' (तै.उ. ३ । १ । १) इत्यादिश्रुत्या । जगज्जन्मस्थितिलयेषु एकैककारणत्वमप्यनन्यगामित्वल्लक्षणं भवितुमर्हतीति चेत् , सत्यम् । लक्षणत्रयमेवेदं परस्परनिपरपेक्षम् । अत एव 'अत्ताचराचरग्रहणात्' (ब्र.सू. १ । १ । ९) इत्याद्यधिकरणेषु सर्वसंहर्तृत्वादिकं प्रत्येकं ब्रह्मलिङ्गतया उपन्यस्तम् इति कौमुदीकाराः ।

अन्ये तु जन्मकारणत्वस्य स्थितिकारणत्वस्य च निमित्तसाधारण्यात् उपादानत्वप्रत्यायनाय प्रपञ्चस्य ब्रह्मणि लयो दर्शितः । अस्तु ब्रह्म जगदुपादानम् , तज्जन्मनि घटजन्मनि कुलालवत् तत्स्थितौ राज्यस्थेमनि राजवत् उपदानादन्यदेव निमित्तं भविष्यतीति शङ्काव्यवच्छेदाय तस्यैव जगज्जननजीवननियामकत्वमुक्तम् । तथा चैकमेवेदं लक्षणम् अभिन्ननिमित्तोपादानतया अद्वितीयं ब्रह्म उपलक्षयतीत्याहुः ।

ब्रह्मणश्च उपादानत्वम् अद्वितीयकूटस्थचैतन्यरूपस्य न परमाणूनामिवारम्भकत्वरूपम् , न वा प्रकृतेरिव परिणामित्वरूपम् , किं तु अविद्यया वियदादिप्रपञ्चरूपेण विवर्तमानत्वलक्षणम् । वस्तुनः तत्समसत्ताकोऽन्यथाभावः परिणामः तदसमसत्ताको विवर्तः इति वा, कारणसलक्षणोऽन्यथाभावः परिणामः तद्विलक्षणो विवर्तः इति वा, कारणाभिन्नं कार्यं परिणामः तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्तः इति वा, विवर्तपरिणामयोर्विवेकः ॥

### शुद्धब्रह्मजीवेश्वराणां मतभेदेन जगदुपादानत्वनिरूपणम्

अथ शुद्धं ब्रह्म उपादानमिष्यते, ईश्वररूपम् , जीवरूपं वा । अत्र संक्षेपशारीरकानुसारिणः केचिदाहुः – शुद्धमेवोपादानम् । जन्मादिसूत्रतद्भाष्ययोः उपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेः । तथा च 'आत्मन आकाशस्सम्भूतः' (तै.उ. २ । १ । १) इत्यादिकारणवाक्येषु शबलवाचिनामात्मादिशब्दानां शुद्धे लक्षणैवेति ॥

विवरणानुसारिणस्तु 'यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतत् ब्रह्म नाम रूपमन्नं च जायाते' (मु.उ. १ । १ । ९) इति श्रुतेः सर्वज्ञत्वादिविशिष्टं मायाशबलमीश्वररूपमेव ब्रह्म उपादानम् । अत एव भाष्ये 'अन्तस्तद्धर्मोपदेशात्' (ब्र.सू. १ । १ । २०) 'सर्वत्र प्रसिद्धोपदेशात्' (ब्र.सू. १ । २ । १) इत्याद्यधिकारणेषु 'सैव ऋक्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म' (छा.उ. १ । ७ । ५) 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' (छा.उ. ३ । १४ । ४) इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वं जीवव्यावृत्तमीश्वरलिङ्गमित्युपवर्णितम् । जीवेश्वरानुस्यूतचैतन्यमात्रस्य सर्वोपादानत्वे तु न तत् जीवव्यावृत्तमीश्वरलिङ्गं स्यत् । सङ्क्षेपशारीरके शबलोपादानत्वनिराकरणमपि मायाविशिष्टोपादानत्वनिराकरणाभिप्रायम् , न तु निष्कृष्टेश्वररूपचैतन्योपादानत्वनिराकरणपरम् ।तत्रैव प्रथमाध्यायान्ते जगदुपादानत्वस्य तत्पदार्थवृत्तित्वोक्तेः । एवञ्च ईश्वरगतमपि कारणत्वं तदनुगतमखण्डचैतन्यं शाखाचन्द्रमसमिव तटस्थतयोपलक्षयितुं शक्नोतीति तस्य ज्ञेयब्रह्मलक्षणत्वोक्तिरिति मन्यन्ते ।

वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्रेश्वर उपादानम् । अन्तःकरणादिकं तु ईश्वराश्रितमायापरिणाममहाभूतोपसृष्टजीवाविद्याकृतभूतसूक्ष्मकार्यमिति तत्रोभयोरुपादानत्वम् । अत एव 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' (प्र.उ. ६ । ५) इति श्रुतौ कलाशब्दवाच्यानां

प्राणमनःप्रभृतीनां विदुषो विदेहकैवल्यसमये विद्यानिवर्त्यविद्याकार्यांशाभिप्रायेण विद्ययोच्छेदो दर्शितः । 'गताः कलाः पञ्चदश प्रतिष्ठाः' (मु.उ. ३ । २ । ७) इति श्रुत्यन्तरे तदनिवर्त्यमायापरिणाममहाभूतरूपोपष्ठम्भककार्यांशाभिप्रयेण तेषां स्वस्वप्रकृतिषु लयो दर्शित इति मायाऽविद्याभेदवादिनः ॥

यथा वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्र ईश्वर उपादानम् , तथा अन्तःकरणादि जीवाश्रिताविद्यामात्रपरिणाम इति तत्र जीव एव उपादानम् ।न च अन्तःकरणादौ मायाकार्यमहाभूतानामप्यननुप्रवेशे उदाहृतश्रुतिद्वयव्यवस्थानुपपत्तिः । कलानां विद्ययोच्छेदश्रुतिस्तत्त्वविद्दृष्टिविषया । 'गताः कलाः' इति श्रुतिस्तु तत्त्वविदि म्रियमाणे समीपवर्तिनः पुरुषाः नश्यद्घटवत्तदीयशरीरादीनामपि भूम्यादिषु लयं मन्यन्ते इति तटस्थपुरुषप्रतीतिविषया, इति व्यवस्थायाः कलाप्रलयाधिकरणभाष्ये स्पष्टत्वादिति मायाऽविद्याभेदवादिष्वेकदेशिनः ॥

तदभेदवादिष्वपि केचित् - यद्यपि वियदादिप्रपञ्चस्य ईश्वर उपादानम् , तथाप्यन्तःकरणादीनां जीवतादात्म्यप्रतितेः जीव एवोपादानम् । अत एव अध्यासभाष्ये अन्तःकरणादीनां जीव एवाध्यासो दर्शितः, विवरणे च प्रतिकर्मव्यवस्थायां ब्रह्मचैतन्यस्योपादानतया घटादिसङ्गित्वं जीवचैतन्यस्य तदसङ्गित्वेऽप्यन्तःकरणादिसङ्गित्वं च वर्णितम् - इत्याहुः ॥

'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' (मु.उ. २ । १ । ३) इत्यादिश्रुतेः कृत्स्नव्यावहारिकप्रपञ्चस्य ब्रह्मैव उपादानम् । जीवस्तु प्रातिभासिकस्य स्वाप्नप्रपञ्चस्य । 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' (ब्र.सू. २ । १ । २६) इत्यधिकरणे - ब्रह्मणो जगदुपादानत्वे तस्य कार्त्स्न्येन जगदाकारेण परिणामे विकारातिरेकेण ब्रह्माभावो वा एकदेशेन परिणामे निरवयवत्वश्रुतिविरोधो वा प्रसज्यत इति पूर्वपक्षे 'आत्मनि चैवं विचित्राश्च हि' (ब्र.सू. २ । १ । २८) इति सूत्रेण विवर्तवादाभिप्रायेण स्वप्नदृशि जीवात्मनि स्वरूपानुपमर्देनानेकाकारस्वाप्नप्रपञ्चसृष्टिवत् ब्रह्मणि वियदादिसृष्टिरुपपद्यत इति-सिद्धान्तितत्वादिति अन्ये ।

जीव एव स्वप्नद्रष्टृवत् स्वस्मिन्नीश्वरत्वादिसर्वकल्पकत्वेन सर्वकारणम् इत्यपि केचित् ।

**मायायाः जगत्कारणत्वविचारः**

अथ 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेः, मायाजाड्यस्य घटादिष्वनुगमाच्च माया जगदुपादानं प्रतीयते । कथं ब्रह्मोपादानम् ?

अत्राहुः पदार्थतत्त्वनिर्णयकाराः –ब्रह्म माया चेत्युभयमुपादानमित्युभयश्रुत्युपपत्तिः । सत्ताजाड्यरूपोभयधर्मानुगत्युपपत्तिश्च । तत्र ब्रह्म विवर्तमानतया उपादानम् , अविद्या परिणममानतया । न च विवर्ताधिष्ठाने पारिभाषिकमुपादानत्वम् । स्वात्मनि कार्यजनिहेतुत्वस्योपादानलक्षणस्य तत्राप्यविशेषादिति ॥

केचित् उक्तामेव प्रक्रियामाश्रित्य विवर्तपरिणामोपादानद्वयसाधारणमन्यल्लक्षणमाहुः– स्वाभिन्नकार्यजनकत्वमुपादानत्वम् । अस्ति च प्रपञ्चस्य सद्रूपेण ब्रह्मणा विवर्तमानेन, जडेनाज्ञानेन परिणामिना च, अभेदः । 'सन् घटः, जडो घटः' इति सामानाधिकरण्यानुभवात् । न च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू. २ । १ । १४) इति सूत्रे 'अनन्यत्वं व्यतिरेकेणाभावः' 'न खल्वनन्यत्वमित्यभेदं ब्रूमः किं तु भेदं व्यासेधामः' इति भाष्यभामतीनिबन्धनाभ्यां प्रपञ्चस्य ब्रह्माभेदनिषेधात् अभेदाभ्युपगमे अपसिद्धान्त इति वाच्यम् । तयोर्ब्रह्मरूपधर्मिसमानसत्ताकाभेदनिषेधे तात्पर्येण शुक्तिरजतयोरिव प्रातीतिकाभेदाभ्युपगमेऽपि विरोधाभावादिति ॥

सङ्क्षेपशारीरककृतस्तु - ब्रह्मैवोपादानम् , कूटस्थस्य स्वतः कारणत्वानुपपत्तेः माया 'द्वारकारणम् , अकारणमपि द्वारं कार्येऽनुगच्छति, मृद इव तद्गतश्लक्ष्णत्वादेरपि घटे अनुगमदर्शनात्' , इत्याहुः ॥

वाचस्पतिमिश्रास्तु - जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया उपादानमिति माया सहकारिमात्रम् , न कार्यानुगतद्वारकारणम् इत्याहुः ॥

सिद्धान्तमुक्तावली कृतस्तु - मायाशक्तिरेवोपादानम् , न ब्रह्म । 'तदेतत् ब्रह्मापूर्वमनपरमबाह्यम्' (बृ.उ. २ । ५ । १९) 'न तस्य कार्यं करणं च विद्यते' (श्वे.उ. ६ । ८) इत्यादिश्रुतेः । जगदुपादानमायाधिष्ठानत्वेन तु उपचारात् उपादानम् , तादृशमेवोपादानत्वं लक्षणे विवक्षितम् इत्याहुः ॥

**जीवेश्वरयोः मतभेदेन स्वरूपनिरूपणम्**

अथ क ईश्वरः कश्च जीवः । अत्रोक्तम् प्रकटार्थविवरणे – अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया । तस्यां चित्प्रतिबिम्ब ईश्वरः, तस्या एव परिच्छिन्नानन्तप्रदेशेषु आवरणविक्षेपशक्तिमत्सु अविद्याभिधानेषु चित्प्रतिबिम्बो जीव इति ॥

तत्त्वविवेके तु - त्रिगुणात्मिकाया मूलप्रकृतेः 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' (नृ.उ. ९ । ३) इति श्रुतिसिद्धौ द्वौ रूपभेदौ । रजस्तमोऽनभिभूतशुद्धसत्वप्रधाना माया, तदभिभूतमलिनसत्वप्रधाना अविद्या, इति मायाविद्याभेदं परिकल्प्य, मायाप्रतिबिम्ब ईश्वरः अविद्याप्रतिबिम्बो जीवः – इत्युक्तम् ॥

एकैव मूलप्रकृतिः विक्षेपप्राधान्येन मायाशब्दिता ईश्वरोपाधिः । आवरणप्राधान्येन अविद्याऽज्ञानशब्दिता जीवोपाधिः । अत एव तस्या जीवेश्वरसाधारणचिन्मात्रसम्बन्धित्वेऽपि जीवस्यैव 'अज्ञोऽस्मि' इत्यज्ञानसम्बन्धानुभवः नेश्वरस्य - इति जीवेश्वरविभागः क्वचित् उपपादितः ।

संक्षेपशारीरके तु - 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतिमनुसृत्य अविद्यायां चित्प्रतिबिम्ब ईश्वरः । अन्तःकरणे चित्प्रतिबिम्बो जीवः । न च – अन्तःकरणरूपेण द्रव्येण घटेनाकाशस्येव चैतन्यस्यावच्छेदसम्भवात् तदवच्छिन्नमेव चैतन्यं जीवोऽस्तु – इति वाच्यम् । इह परत्र च जीवभावेनावच्छेद्यचैतन्यप्रदेशस्य भेदेन कृतहानाकृताभ्यागमप्रसङ्गात् । प्रतिबिम्बस्तु उपाधेर्गतागतयोरवच्छेद्यवत् न भिद्यत इति प्रतिबिम्बपक्षेनायं दोषः –इत्युक्तम् ।

एवमुक्तेष्वेतेषु जीवेश्वरयोः प्रतिबिम्बविशेषत्वपक्षेषु , यत् बिम्बस्थानीयं ब्रह्म तत् मुक्तप्राप्यं शुद्धचैतन्यम् ॥

चित्रदीपे - 'जीव ईशो विशुद्धाचित्' इति चित्त्रैविध्यप्रक्रियां विहाय यथा घटावच्छिन्नाकाशो घटाकाशः , तदाश्रिते जले प्रतिबिम्बितः साभ्रनक्षत्रो जलाकाशः, अनवच्छिन्नो महाकाशः, माहाकाशमध्यवर्तिनि मेघमण्डले वृष्टिलक्षणकार्यानुमेयेषु जलरूपतदवयवेषु तुषाराकारेषु प्रतिबिम्बतो मेघाकाशः , इति वस्तुत एकस्याप्याकाशस्य चातुर्विध्यम् , तथा स्थूलसूक्ष्मदेहद्वयस्य अधिष्ठानतया वर्तमानं तदवच्छिन्नं चैतन्यं कूटवन्निर्विकारत्वेन स्थितं कूटस्थम् । तत्र कल्पितेऽन्तःकरणे प्रतिबिम्बितं चैतन्यं संसारयोगी जीवः , अनवच्छिन्नं चैतन्यं ब्रह्म, तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिबिम्बितं चैतन्यम् ईश्वरः , इति चैतन्यस्य चातुर्विध्यं परिकल्प्य अन्तःकरणधीवासनोपरक्ताज्ञानोपाधिभेदेन जीवेश्वरविभागो दर्शितः ।

अयं चापरस्तदभिहितो विशेषः– चतुर्विधेषु चैतन्येषु जीवः 'अहम्' इति प्रकाशमानः कूटस्थे अविद्यातिरोहिताज्ञानन्दरूपविशेषांशे शुक्तौ रूप्यवदध्यस्तः । अत एव इदन्त्वरजतत्वयोरिव अधिष्ठानसामान्यांशाध्यस्तविशेषांशरूपयोः स्वयन्त्वाहन्त्वयोः सह प्रकाशः 'स्वयमहं करोमि' इत्यादौ । अहन्त्वं हि अध्यस्तविशेषांशरूपम् । पुरुषान्तरस्य पुरुषान्तरे 'अहम्' इति व्यवहाराभावेन व्यावृत्तत्वात् । स्वयन्त्वं च अन्यत्वप्रतियोग्यधिष्ठानसामान्यांशरूपम् । 'स्वयं देवदत्तो गच्छति' इति पुरुषान्तरेऽपि व्यवहारेण अनुवृत्तत्वात् । एवं परस्पराध्यासादेव कूटस्थजीवयोरविवेको लौकिकानाम् । विवेकस्तु तयोः बृहदारण्यके 'प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' (बृ.उ. ४ । ५ । १३) इति जीवाभिप्रायेण उपाधिविनाशप्रतिपादनेन 'अविनाशी वा

अरेऽयमात्मा' (बृ.उ. ४ । ५ । १४) इति कूटस्थाभिप्रायेणाविनाशप्रतिपादनेन च स्पष्टः । अहमर्थजीवस्य विनाशित्वे कथमविनाशिब्रह्मभेदः । नेदमभेदे सामानाधिकरण्यम् , किन्तु बाधायाम् । यथा 'यः स्थाणुरेष पुमान्' इति पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्त्यते, एवं 'अहं ब्रह्मास्मि' इति कूटस्थब्रह्मस्वरूपत्वबोधेन अध्यस्ताहमर्थरूपत्वं निवर्त्यते । 'योऽयं स्थाणुः पुमानेष पुंधिया स्थणुधीरिव । ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्तते ॥' (नै.सि. २ । २९) इति नैष्कर्म्यसिद्धिवचनात् ।

यदि च विवरणाद्युक्तरीत्या इदमभेदे सामानाधिकरण्यम् , तदा जीववाचिनोऽहंशब्दस्य लक्षणया कूटस्थपरत्वम् अस्तु । तस्यानध्यस्तस्य ब्रह्माभेदयोग्यत्वात् ।

यस्तु मेघाकाशतुल्यो धीवासनाप्रतिबिम्ब ईश्वर उक्तः सोऽयं 'सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्' (मा.उ. १ । ५) इति माण्डूक्यश्रुतिसिद्धसौषुप्तानन्दमयः । तत्रैव तदनन्तरम् 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्' (मा.उ. १ । ६) इति श्रुतेः । सर्ववस्तुविषयकसकलप्राणिधीवासनोपाधिकस्य तस्य सर्वज्ञत्वस्य तत एव सर्वकर्तृत्वादेरपि उपपत्तेश्च । न चास्मद्बुद्धिवासनोपहितस्य कस्यचित् सार्वज्ञ्यं नानुभूयत इति वाच्यम् । वासनानां परोक्षत्वेन तदुपहितस्यापि परोक्षत्वात् इति ॥

ब्रह्मानन्दे तु - सुषुप्तिसंयोगात् माण्डूक्योक्त आनान्दमयो जीव इत्युक्तम् । यदा हि जाग्रदादिषु भोगप्रदस्य कर्मणः क्षये निद्रारूपेण विलीनमन्तःकरणं पुनर्भोगप्रदकर्मवशात् प्रबोधे घनीभवति, तदा तदुपाधिको जीवः विज्ञानमय इत्युच्यते । स एव पूर्वं सुषुप्तिसमये विलीनावस्थोपाधिकः सन् अनन्दमय इत्युच्यते । स एव माण्डूक्ये 'सुषुप्तस्थानः' इत्यादिना दर्शित इति ।

एवं सति तस्य सर्वेश्वरत्वादिवचनं कथं सङ्गच्छताम् ।

इत्थं - सन्त्यधिदैवतमध्यात्मं च परमात्मनः सविशेषाणि त्रीणि त्रीणिरूपाणि । तत्र अधिदैवतं त्रीणि शुद्धं चैतन्यं च इति चत्वारि रूपाणि चित्रपटदृष्टान्तेन चित्रदीपे समर्थितानि । यथा - स्वतश्शुभ्रः पटो धौतः, अन्नविलिप्तो घट्टितः, मष्याकारयुक्तो लाञ्छितः, वर्णपूरितो रञ्जितः, इत्यवस्थाचतुष्टयम् एकस्यैव चित्रपटस्य, तथा परमात्मा मायातत्कार्योपाधिरहितः शुद्धः मायोपहित ईश्वरः, अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः, पञ्चीकृतभूतकार्यसमष्टिस्थूलशरीरोपहितो विराट्पुरुषः, इत्यवस्थाचतुष्टयम् एकस्यैव परमात्मनः । अस्मिन् चित्रपटस्थानीये परमात्मनि चित्रस्थनीयः स्थावरजङ्गमात्मको निखिलप्रपञ्चः । यथा चित्रगतमनुष्याणां

चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यन्ते, तथा परमात्माध्यस्तदेहिनाम् अधिष्ठानचैतन्यसदृशाश्चिदाभासाः कल्प्यन्ते, ते च जीवनामानः संसरन्ति – इति । अध्यात्मं तु विश्वतैजसप्राज्ञभेदेन त्रिणि रूपाणि । तत्र सुषुप्तौ विलीनेऽन्तःकारणे अज्ञानमात्रसाक्षी प्राज्ञः, योऽयमिहानन्दमय उक्तः । स्वप्ने व्यष्टिसूक्ष्मशरीराभिमानी तैजसः । जागरे व्यष्टिस्थूलशरीराभिमानी विश्वः । तत्र माण्डूक्यश्रुतिः अहमनुभावे प्रकाशमानस्यात्मनो विश्वतैजसप्राज्ञतुर्यावस्थाभेदरूपं पादचतुष्टयं 'सोऽयमात्माचतुष्पात्' (मा.उ. १ । २) इत्युपक्षिप्य पूर्वपूर्वपादप्रविलापनेन निष्प्रपञ्चब्रह्मात्मकतुर्यपादप्रतिपत्तिसौकर्याय स्थूलसूक्ष्मतरोपाधिसाम्यात् विराडादीन् विश्वादिष्वन्तर्भाव्य 'जागरितस्थानो बहिः प्रज्ञः' (मा.उ. १ । ३) इत्यादिना विश्वादिपादान्यरूपयत् । अतः प्राज्ञशब्दिते आनन्दमये आव्याकृतस्येश्वरस्यान्तर्भावं विवक्षित्वा तस्य सर्वेश्वरत्वादितद्धर्मवचनमिति । इत्थमेव भगवत्पादैर्गौडपादीयविवरणे व्याख्यातम् ।

दृग्दृश्यविवेके तु - चित्रदीपव्युत्पादितं कूटस्थं जीवकोटावन्तर्भाव्य चित्त्रैविध्यप्रक्रियैवावलम्बिता इति विशेषः । तत्र ह्युक्तम् - जलाशयतरङ्गबुद्बुदन्यायेन उपर्युपरिकल्पनात् जीवः त्रिविधः - पारमार्थिको व्यावहारिकः प्रातिभासिकश्चेति । तत्र अविच्छिन्नः पारमार्थिको जीवः । तस्मिन्नवच्छेदकस्य कल्पितत्वेऽपि अवच्छेद्यस्य तस्य अकल्पितत्वेन ब्रह्मणोऽभिन्नत्वात् । तमावृत्यस्थितायां मायायां कल्पितेऽन्तःकरणे चिदाभासः अन्तःकरणतादात्म्यापत्त्या 'अहं' इत्यभिमन्यमानो व्यावहारिकः । तस्य मायिकत्वेऽपि यावद्व्यवहारमनुवृत्तेः । स्वप्ने तमप्यावृत्त्य स्थितया मायावस्थाभेदरूपया निद्रया कल्पिते स्वप्नदेहादौ अहमभिमानी प्रातिभासिकः । स्वप्नप्रपञ्चेन सह तद्द्रष्टुर्जीवस्यापि प्रबोधे निवृत्तेः इति । एवम् एते प्रतिबिम्बेश्वरवादिनां पक्षभेदाः दर्शिताः ।

विवरणानुसारिणस्तु आहुः – 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते' (वि.पु. ६ । ७ । ९६) इति स्मृत्या एकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनात् बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभागः, न उभयोरपि प्रतिबिम्बभावेन । उपाधिद्वयमन्तरेण उभयोः प्रतिबिम्बत्वायोगात् । तत्रापि प्रतिबिम्बो जीवः बिम्बस्थनीय ईश्वरः । तथा सत्येव लौकिकबिम्बप्रतिबम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यं च जीवस्य युज्यते ।

'प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिविक्रियाः ।
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रियाः ॥'

इति कल्पतरूक्तरीत्या 'लोकवत्तु लीलाकैवल्यम्' (ब्र.सू. २ । १ । ३३) इति सूत्रमपि सङ्गच्छते । अज्ञानप्रतिबिम्बितस्य जीवस्य अन्तःकरणरूपोऽज्ञानपरिणामभेदः विशेषाभिव्यक्तिस्थानं सर्वतः प्रसृतस्य

सवितृप्रकाशस्य दर्पण इव । अतः तस्य तदुपाधिकत्वव्यवहारोऽपि । न एतावता अज्ञानोपाधिपरित्यागः । अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः । न च - योगप्रभावात् योगिनोऽन्तःकरणं कायव्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठानं युज्यते -इति वाच्यम् । 'प्रदीपवदावेशस्तथा हि दर्शयति' (ब्र.सू. ४ । ४ । १५) इति शास्त्रोपान्त्यधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवत् भिन्नस्यैव योगप्रभावात् सृष्टेरुपवर्णनात् । प्रतिबिम्बे बिम्बात् भेदमात्रस्य अध्यस्तत्वेन स्वरूपेण तस्य सत्यत्वात् न प्रतिबिम्बरूपजीवस्य मुक्त्यन्वयासम्भवः इति न तदतिरेकेण मुक्त्यन्वयाय अवच्छिन्नरूपजीवान्तरं वा (प्रतिबिम्बजीवातिरिक्तं) जिवेश्वरविलक्षणं कूटस्थशब्दितं चैतन्यान्तरं वा कल्पनीयम् । 'अविनाशी वा अरेऽयमात्मा' इति श्रवणं जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि स्वरूपं न विनश्यतीत्येतत्परम् , न तदतिरिक्तकूटस्थनामकचैतन्यान्तरपरम् । जीवोपाधिना अन्तःकरणादिना अवच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव । 'यो विज्ञाने तिष्ठन्' (बृ.उ. ३ । ७ । २२) इत्यादिश्रुत्या ईश्वरस्यैव जीवसन्निधानेन तदन्तर्यामिभावेन विकारान्तरवस्थानश्रवणात् इति ।

अन्ये तु - रूपानुपहितप्रतिबिम्बो न युक्तः, सुतरां नीरूपे ।

गगनप्रतिबिम्बोदाहरणमप्ययुक्तम् । गगनाभोगव्यापिनि सवितृकिरणमण्डले सलिलप्रतिबिम्बिते गगनप्रतिबिम्बत्वव्यवहारस्य भ्रममात्रमूलकत्वात् ।

ध्वनौ वर्णप्रतिबिम्बवादोऽप्ययुक्तः । व्यञ्जकतयासन्निधानमात्रेण ध्वनिधर्मणामुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तेः ध्वनेर्वर्णप्रतिबिम्बग्राहित्वकल्पनाया निष्प्रमाणकत्वात् ।

प्रतिध्वनिरपि न पूर्वशब्दप्रतिबिम्बः । पञ्चीकरणप्रक्रियया पटहपयोनिधिप्रभृतिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्वनेरेवाकाशशब्दत्वेन तस्य अन्यशब्दप्रतिबिम्बत्वायोगात् ।

वर्णरूपप्रतिशब्दोऽपि न पूर्ववर्णप्रतिबिम्बः । वर्णाभिव्यञ्जकध्वनिनिमित्तकप्रतिध्वनेः मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेनोपपत्तेः । तस्मात् घटाकाशवत् अन्तःकरणावच्छिन्नं चैतन्यं जीवः, तदनवच्छिन्नम् ईश्वरः ।

न चैवम् - अण्डान्तर्वर्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिः सर्वात्मना जीवभावेनावच्छेदात् तदवच्छेदरहितचैतन्यरूपस्य ईश्वरस्य अण्डात् बहिरेव सत्त्वं स्यात् इति 'यो विज्ञाने तिष्ठन्' इत्यादौ अन्तर्यामिभावेन विकारान्तरवस्थानश्रवणं विरुध्येत । प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनात् एकत्र द्विगुणीकृत्य वृत्तिरुपपद्यते - इति वाच्यम् । यतः प्रतिबिम्बपक्षेऽपि उपाधौ अनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो

वाच्यः, न तु जलचन्द्रन्यायेन कृत्स्नप्रतिबिम्बः । तदन्तर्गतभागस्य तत्र प्रतिबिम्बासम्भवात् । न हि मेघावच्छिन्नस्य आकाशस्यालोकस्य वा जले प्रतिबिम्बवत् जलान्तर्गतस्यापि तत्र प्रतिबिम्बो दृश्यते । न वा मुखादीनां बहिःस्थितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबिम्बोऽस्ति । अतो जलप्रतिबिम्बं प्रतिमेघाकाशादेरिव अन्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदनन्तर्गतस्यैव बिम्बत्वं स्यात् इति बिम्बभूतस्य विकारान्तरवस्थानायोगात् ईश्वरे अन्तर्यामिब्रह्मणसामञ्जस्याभावस्तुल्यः ।

एतेन - अवच्छिन्नस्य जीवत्वे कर्तृभोक्तृसमययोः तत्रतत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागमप्रसङ्ग इति - निरस्तम् ।

प्रतिबिम्बपक्षेऽपि स्वानन्तर्गतस्य स्वसन्निहितस्य चैतन्यप्रदेशस्य अन्तःकरणे प्रतिबिम्बस्य वक्तव्यतया तत्र तत्र अन्तःकरणस्य गमने बिम्बभेदात् तत्प्रतिबिम्बस्यापि भेदावश्यम्भावेन दोषतौल्यात् । न च अन्तःकरणप्रतिबिम्बो जीव इति पक्षे दोषतौल्येऽपि 'अविद्याप्रतिबिम्बो जीवः, तस्य च तत्र तत्र गत्वरमन्तःकरणं जलाशयव्यापिनो महामेघमण्डलप्रतिबिम्बस्य तदुपरि विसृत्वरस्फीतालोक इव तत्र तत्र विशेषाभिव्यक्तिहेतुः' इति पक्षे नायं दोषः, अन्तःकरणवत् अविद्यायाः गत्यभावेन प्रतिबिम्बभेदानापत्तेः इति - वाच्यम् । तथैव अवच्छेदपक्षेऽप्यविद्यावच्छिन्नो जीव इति उपगमसम्भवात् । तत्राप्येकस्य जीवस्य क्वचित् प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृत्वम् इत्येवं कृतहानादिदोषापनुत्तये वस्तुतो जीवैक्यस्य आदरणीयत्वेन तन्न्यायात् अन्तःकरणोपाधिपक्षेऽपि वस्तुतश्चैतन्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तन्त्रत्वाभ्युपगमेन तद्दोषनिराकरणसम्भवाच्च ।

न च अवच्छेदपक्षे 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' 'अत एव चोपमा सूर्यकादिवत्' (ब्र.सू. ३ । २ । १८) इति श्रुतिसूत्राभ्यां विरोधः । 'अम्बुवदग्रहणात्तु न तथात्वम्' (ब्र.सू. ३ । २ । १९) इति उदाहृतसूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यं ततो विप्रकृष्टदेशं रूपवज्जलं गृह्यते, नैवं सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किञ्चिदस्ति ततो विप्रकृष्टम् इति प्रतिबिम्बासम्भवमुक्त्वा 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' (ब्र.सू. ३ । २ । २०) इति तदनन्तरसूत्रेण 'यथा जलप्रतिबिम्बितसूर्यो जलवृद्धौ वर्धत इव जलह्रासे ह्रसतीव जलचलने चलतीव इति तस्याध्यासिकं जलानुरोधिवृद्धिह्रासादिभाक्त्वम् , तथा आत्मनोऽन्तःकरणादिनाऽवच्छेदेन उपाध्यन्तर्भावात् आध्यासिकं तदनुरोधिवृद्धिह्रासादिभाक्त्वम् इत्येवं दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यात् अविरोधः' इति स्वयं सूत्रकृतैव अवच्छेदपक्षे

तयोः तात्पर्यकथनात् । 'घटसंवृतमाकाशं नीयमाने घटे यथा । घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥' 'अंशो नानाव्यपदेशात्……..' (ब्र.सू. २ । ३ । ४३) इति श्रुतिसूत्राभ्याम् अवच्छेदपक्षस्यैव परिग्रहाच्च ।

तस्मात् सर्वगतस्य चैतन्यस्य अन्तःकरणादिनाऽवच्छेदोऽवश्यम्भावी इति आवश्यकत्वात् अविच्छिन्नो जीवः - इति पक्षं रोचयन्ते ।

अपरे तु - न प्रतिबिम्बः नाप्यवच्छिन्नो जीवः । किं तु कौन्तेयस्यैव राधेयत्ववत् अविकृतस्यैव ब्रह्मणः अविद्यया जीवभावः । व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन 'ब्रह्मैव स्वाविद्यया संसरति, स्वविद्यया मृच्यते' इति बृहदारण्यकभाष्ये प्रतिपादनात् । 'राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते । यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः ।' (सं.वा. २३३ - २३४) इति वार्तिकोक्तेश्च । एवं च स्वाविद्यया जीवभावमापन्नस्यैव ब्रह्मणः सर्वप्रपञ्चकल्पकत्वात् ईश्वरोऽपि सह सर्वज्ञत्वादिधर्मैः स्वप्नोपलब्धदेवतादिवत् जीवकल्पितः इत्याचक्षते ।

**जीवैकत्वनानात्वविचारः**

आथायं जीव एकः, उतानेकः । अनुपदोक्तपक्षावलम्बिनः केचिदाहुः - एको जीवः । तेन चैकमेव शरीरं सजीवम् । अन्यानि स्वप्नदृष्टशरीराणीव निर्जीवानि । तदज्ञानकल्पितं सर्वं जगत् । तस्य स्वप्नदर्शनवद्यावदविद्यं सर्वो व्यवहारः । बद्धमुक्तव्यवस्थापि नास्ति जीवस्यैकत्वात् । शुकमुक्त्यादिकमपि स्वाप्नपुरुषान्तरमुक्त्यादिकमिव कल्पितम् । अत्र च सम्भावितसकलशङ्कापङ्कप्रक्षालनं स्वप्नदृष्टान्तसलिलधारयैव कर्तव्यम् – इति ।

अन्ये तु - अस्मिन्नेकशरीरैकजीववादे मनःप्रत्ययमलभमानाः 'अधिकं तु भेदनिर्देशात्' (ब्र.सू. २ । १ । २२) 'लोकवत्तु लीलाकैवल्यम्' (ब्र.सू. २ । १ । ३३) इत्यादिसूत्रैः 'जीवाधिक ईश्वर एव जगतः स्रष्टा, न जीवः, तस्य आप्तकामत्वेन प्रयोजनाभावेऽपि केवलं लीलाजगतः सृष्टिः' इत्यादि प्रतिपादयद्भिः विरोधं च मन्यमानाः - हिरण्यगर्भ एको ब्रह्मप्रतिबिम्बो मुख्यो जीवः, अन्ये तु तत्प्रतिबिम्बभूताः चित्रपटलिखितमनुष्यदेहार्पितपटाभासकल्पाः जीवाभासाः संसारादिभाजः - इति सविशोषानेकशरीरैकजीववादमातिष्ठन्ते ।

अपरे तु - हिरण्यगर्भस्य प्रतिकल्पं भेदेन कस्य हिरण्यगर्भस्य मुख्यजीवत्वमित्यत्र नियामकं नास्तीतिमन्यमानाः – एक एव जीवोऽविशेषेण सर्वं शरीरमधितिष्ठति । नचैवं शरीरावयवभेद इव शरीरभेदेऽपि परस्परसुखाद्यनुसन्धानप्रसङ्गः । जन्मान्तरीयसुखाद्यनुसन्धानादर्शनेन शरीरभेदस्य तदननुसन्धानप्रयोजकत्वक्लृप्तेः । योगिनस्तु कायव्यूहसुखाद्यनुसन्धानं व्यवहितार्थग्रहणवत् योगप्रभावनिबन्धनमिति न तत् उदाहरणम् – इति अविशेषानेकशरीरैकजीववादं रोचयन्ते ।

इतरे तु अत्रापि बन्धमुक्तिव्यवस्थाभावस्य तुल्यत्वेन 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' (बृ.उ. १ । ४ । १०) इत्यादिश्रुतेः 'प्रतिषेधादिति चेन्न शारीरात्' (ब्र.सू. ४ । २ । १२) इत्यधिकरणे शुकमुक्तत्वप्रतिपादकभाष्यस्य चानाञ्जस्यमित्यपरितुष्यन्तः अन्तःकरणादीनां जीवोपाधित्वाभ्युपगमेन अनेकजीववादमाश्रित्य बन्धमुक्तिव्यवस्थां प्रतिपद्यन्ते ।

तेषु केचिदेवमाहुः - यद्यपि शुद्धब्रह्माश्रयविषयमेकमेवाज्ञानम् , तन्नाश एव च मोक्षः तथापि जीवन्मुक्तावज्ञानलेशानुवृत्त्यभ्युपगमेन अज्ञानस्य सांशत्वात् तदेव क्वचिदुपाधौ ब्रह्मावगमोत्पत्तौ अंशेन निवर्तते, उपाध्यन्तरेषु यथापूर्वमंशान्तरैरनुवर्तते – इति ।

अन्ये तु - यथा न्यायैकदेशिमते भूतले घटात्यन्ताभावस्य वृत्तौ घटसंयोगाभावो नियामक इत्यनेकेषु प्रदेशेषु तद्वत्सु संसृज्य वर्तमानघटात्यन्ताभावः क्वचित्प्रदेशे घटसंयोगोत्पत्त्या तदभावनिवृत्तौ न संसृज्यते, एवमज्ञानस्य चैतन्ये वृत्तौ मनोनियामकमिति तदुपाधिना तत्प्रदेशेषु संसृज्य वर्तमानमज्ञानं क्वचिद्ब्रह्मदर्शनोत्पत्त्या 'भिद्यते हृदयग्रन्थिः' इति श्रुत्युक्तरीत्या मनसो निवृत्तौ न संसृज्यते, अन्यत्र यथापूर्वमवतिष्ठते । अज्ञानसंसर्गासंसर्गादेव च बन्धमोक्षौ - इत्याहुः ।

अपरे तु - नाज्ञानं शुद्धचैतन्याश्रयम् , किं तु जीवाश्रयं ब्रह्मविषयम् । अतश्च अन्तःकरणप्रतिबिम्बरूपेषु सर्वेषु जीवेषु व्यक्तिषु जातिवत् प्रत्येकपर्यवसिततया वर्तमानम् उत्पन्नविद्यं कञ्चिज्जहाति नष्टां व्यक्तिमिव जातिः स एव मोक्षः । अन्यं यथापूर्वमाश्रयति, इति व्यवस्था इत्याहुः ।

इतरे तु प्रतिजीवमविद्याभेदमभ्युपगम्यैव तदनुवृत्तिनिवृत्तिभ्यां बन्धमुक्तिव्यवस्थां समर्थयन्ते ।

**नानाविद्यावादे प्रपञ्चैकत्वनानात्वविचारः**

अस्मिन पक्षे कस्याविद्यया प्रपञ्चः कृतोऽस्त्विति चेत् –

विनिगमकाभावात् सर्वाविद्याकृतोऽनेकतन्त्वारब्धपटतुल्यः, एकस्य मुक्तौ तदविद्यानाशे एकतन्तुनाशे पटस्येव तत्साधारणप्रपञ्चस्य नाशः, तदैव विद्यमातन्त्वन्तरैः पटान्तरस्येव इतराविद्याभिः सकलेतरसाधारणप्रपञ्चान्तरस्योत्पादनम् इत्येके ।

तत्तदज्ञानकृतप्रातिभासिकरजतवत् न्यायमते तत्तदपेक्षाबुद्धिजन्यद्वित्ववच्च तत्तदविद्याकृतो वियदादिप्रपञ्च प्रतिपुरुषं भिन्नः । शुक्तिरजते 'त्वया यद्दृष्टं रजतं तदेव मयापि' इतिवत् ऐक्यभ्रममात्रम् – इत्यन्ये ।

जिवाश्रिताविद्यानिवहाद्भिन्ना मायैव ईश्वराश्रिता प्रपञ्चकारणम् । जीवानामविद्यास्तु आवरणमात्रे प्रातिभासिकशुक्तिरजतादिविक्षेपेऽपि वा उपयुज्यन्ते – इत्यपरे ।

**ब्रह्मणः कर्तृत्ववादः**

अवसितम् उपादानत्वम् , तत्प्रसक्तानुप्रसक्तं च ।

अथ किंदृशं कत्वर्तृम् ।

केचिदाहुः - 'तदैक्षत' (छा.उ. ६ । २ । ३) 'सोऽकामयत' (तै.उ. २ । ६ । ४) 'तदात्मानं स्वयमकुरुत' (तै.उ. २ । ७ । १) इति श्रवणात् न्यायमत इव कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वरूपमिति ।

0

अन्ये तु - चिकीर्षाकृतिकर्तृत्वनिर्वाहाय चिकीर्षाकृत्यन्तरापेक्षायाम् अनवस्थाप्रसङ्गात् कार्यानुकूलज्ञानवत्त्वमेव ब्रह्मणः कर्तृत्वम् । न च ज्ञानेऽप्येष प्रसङ्गः । तस्य ब्रह्मस्वरूपत्वेनाकार्यत्वात् । एवं च – विवरणे जीवस्य सुखादिकर्तृत्वोक्तिः, वीक्षणमात्रसाध्यत्वात् वियदादि वीक्षितं हिरण्यगर्भद्वारा साध्यं वीक्षणाधिकयत्नसाध्यत्वात् भौतिकं स्मितम् इति कल्पतरूक्तिश्च सङ्गच्छते– इति वदन्ति ।

अपरे तु कार्यानुकूलस्रष्टव्यालोचनरूपज्ञानवत्त्वं कर्तृत्वम् , न कार्यानुकूलज्ञानवत्त्वमात्रम् । शुक्तिरजतस्वाप्नभ्रमादिषु अध्यासानुकूलाधिष्ठानज्ञानवत्त्वेन जीवस्य कर्तृत्वप्रसङ्गात् । न च इष्टापत्तिः - 'अथ रथान् रथयोगान् पथः सृजते...स हि कर्ता' (बृ.उ. ४ । ३ । १०) इत्यादिश्रुत्यैव जीवस्य स्वप्नप्रपञ्चकर्तृत्वोक्तेः - इति वाच्यम् । भाष्यकारैः 'लाङ्गलं गवादीनुद्वहतीतिवत् कर्तृत्वोपचारमात्रं रथादिप्रतिभाननिमित्तत्वेन' इति व्याख्यातत्वात् इत्याहुः ।

अनेनैव निखिलप्रपञ्चरचनाकर्तृभावेनार्थसिद्धिं सर्वज्ञत्वं ब्रह्मणः 'शास्त्रयोनित्वात्' (ब्र.सू. १ । १ । ३) इत्यधिकरणे वेदकर्तृत्वेनापि समर्थितम् ।

**ईश्वरसर्वज्ञत्ववादः**

अथ कथं ब्रह्मणःसर्वज्ञत्वं सङ्गच्छते, जीववत् अन्तःकरणाभावेन ज्ञातृत्वस्यैवायोगात् । अत्र सर्ववस्तुविषयसकलप्राणिधीवासनोपरक्ताज्ञानोपाधिक ईश्वरः, अतस्तस्य सर्वविषयवासनासाक्षितया सर्वज्ञत्वम् इति भारतीतीर्थादि पक्षः प्रगेव दर्शतः ।

प्रकटार्थकारास्त्वाहुः - यथा जीवस्य स्वोपाध्यन्तःकरणपरिणामाश्चैतन्यप्रतिबिम्बग्राहिणः (सन्ति) इति तद्योगात् ज्ञातृत्वम् , एवं ब्रह्मणः स्वोपाधिमायापरिणामश्चित्प्रतिबिम्बग्राहिणस्सन्तीति तत्प्रतिबिम्बितैः स्फुरणैः कालत्रयवर्तिनोऽपि प्रपञ्चस्यापरोक्ष्येणाकलनात् सर्वज्ञत्वमिति ।

तत्त्वशुद्धिकारास्तु - उक्तरीत्या ब्रह्मणो विद्यमाननिखिलप्रपञ्चसाक्षात्कारसम्भवः, तज्जनिततत्संस्कारवृत्तया च स्मरणोपपत्तेरतीतसकलवस्त्ववभाससिद्धिः, सृष्टेः प्राक् मायायाः सृज्यमाननिखिलपादार्थस्फुरणरूपेण जीवादृष्टानुरोधेन विवर्तमानत्वात् तत्साक्षितया तदुपाधिकस्य ब्रह्मणोऽपि तत्साधकत्वसिद्धेः अनागतवस्तुविज्ञानोपपत्तिः, इति सर्वज्ञत्वं समर्थयन्ते ।

कौमुदीकृतस्तु वदन्ति - स्वरूपज्ञानेनैव ब्रह्मणः स्वसंसृष्टसर्वावभासकत्वात् सर्वज्ञत्वम् । अतीतानागतयोरपि अविद्याचित्रभित्तौ विमृष्टानुन्मीलितचित्रवत् संस्कारात्मना सत्त्वेन तत्संसर्गस्याप्युपपत्तेः । न तु वृत्तिज्ञानैः तस्य सर्वज्ञत्वम् । 'तमेव भान्तमनुभाति सर्वम्' (क.उ. २ । २ । १५) इति सावधारणश्रुतिविरोधात् , सृष्टेः प्राक् 'एकमेवाद्वितीयम्' (छा.उ. ६ । २ । १) इत्यवधारणानुरोधेन महाभूतानामिव वृत्तिज्ञानानामपि प्रलयस्य वक्तव्यतया ब्रह्मणः तदा सर्वज्ञत्वाभावापत्त्या प्राथमिकमायाविवर्तरूपे ईक्षणे तत्पूर्वके महाभूतादौ च स्रष्टृत्वाभावप्रसङ्गाच्च । एवं सति ब्रह्मणस्सर्वविषयज्ञानात्मकत्वमेव स्यात् , न तु सर्वज्ञानकर्तृत्वरूपम् सर्वज्ञत्वम् , इति चेत् - सत्यम् । सर्वविषयज्ञानात्मकमेव ब्रह्म, न तु सर्वज्ञानकर्तृत्वरूपं ज्ञातृत्वमस्ति । अत एव 'वाक्यान्वयात्' (ब्र.सू. १ । ४ । १९) इत्यधिकरणे विज्ञातृत्वं जीवलिङ्गमित्युक्तं भाष्यकारैः । 'यस्सर्वज्ञः' इत्यादिश्रुतिरपि तस्य ज्ञानरूपत्वाभिप्रायेणैव योजनीया इति ।

यद्यपि ब्रह्म स्वरूपचैतन्येनैव स्वसंसृष्टसर्वावभासकम् , तथापि तस्य स्वरूपेणाकार्यत्वेऽपि दृश्यावच्छिन्नरूपेण ब्रह्मकार्यत्वात् 'यस्सर्वज्ञः' इत्यादिज्ञानजनिकर्तृत्वश्रुतेरपि न कश्चिद्विरोधः इति वाचस्पतिमिश्राः ।

**जीवाल्पत्वनिरूपणम् (प्रतिकर्म व्यवस्थावर्णनम्)**

ननु ईश्वरवज्जीवोऽपि वृत्तिमनपेक्ष्य स्वरूपचैतन्येनैव किमिति विषयान्नावभासयति ॥

अत्रोक्तं विवरणे – 'ब्रह्मचैतन्यं सर्वोपादानतया सर्वतादात्म्यापन्नं यत्स्वसंसृष्टं सर्वमवभासयति न जीवचैतन्यम् । तस्य अविद्योपाधिकतया सर्वगतत्वेऽपि अनुपादानत्वेन असङ्गित्वात् । यथा सर्वगतं गोत्वसामान्यं स्वभावादश्वादिव्यक्तिसङ्गित्वाभावेऽपि सास्नादिमद्व्यक्तौ संसृज्यते, एवं विषयान्तरासङ्ग्यपि जीवः स्वभावादन्तःकरणेन संसृज्यते । तथा च यदा अन्तःकरणस्य परिणामो वृत्तिरूपो नयनादिद्वारेण निर्गत्य विषयपर्यन्तं चक्षुरश्मिरिव झटिति दीर्घप्रभाकारेण परिणम्य विषयं व्याप्नोति, तदा तमुपारुह्य तं विषयं गोचरयति । केवलाग्न्यदाह्यस्यापि तृणादेः अयःपिण्डसमारूढाग्निदाह्यत्ववत् केवलजीवचैतन्यप्रकाश्यस्यापि घटादेः अन्तःकरणवृत्त्युपारूढतत्प्रकाश्यत्वं युक्तम् ।

यद्वा अन्तःकरणोपाधिकत्वेन जीवः परिच्छिन्नः । अतः संसर्गाभावात् न घटादिकमवभासयति । वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तु तं विषयं प्रकाशयति ।

अथवा जीवः सर्वगतोऽप्यविद्यावृत्तित्वात् स्वयमप्यप्रकाशमानतया विषयान्नावभासयति । विषयविशेषे वृत्त्युपरागादौ आवरणतिरोधानेन तत्रैवाभिव्यक्तः तमेव विषयं प्रकाशयति । एवं च चिदुपरागार्थत्वेन , विषयचैतन्याभेदाभिव्यक्त्यर्थत्वेन , आवारणाभिभवार्थत्वेन वा वृत्तिनिर्गममपेक्ष्य तत्संसृष्टविषयमात्रावभासकत्वात् जीवस्य किञ्चिज्ज्ञत्वमप्युपपद्यते - इति ।

**सम्बन्धवादः**

अत्र प्रथमे पक्षे सर्वगतस्य जीवस्य वृत्त्यधीनः को विषयोपरागः । वृत्त्यापि पूर्वसिद्धयोर्निष्क्रिययोर्विषयजीवचैतन्ययोस्तादात्म्यस्य संयोगस्य वा न सम्भवत्याधानम् ।

अत्र केचिदाहुः – विषयविषयिभावसम्बन्ध एवेति ।

अन्ये तु – विषयविषयिभावमात्रे नियामिका वृत्तिश्चेत् अनिर्गताया अपि ऐन्द्रियकवृत्तेः तन्नियामकत्वं नातिप्रसङ्गावहमिति तन्निर्गमाभ्युपगमवैयर्थ्यापत्तेः स नाभिसंहितः, किं तु विषयसन्निहितजीवचैतन्यतादात्म्यापन्नाया वृत्तेर्विषयसंयोगे तस्यापि तद्वारकः परम्परासम्बन्धो लभ्यत इति स एव चिदुपरागोऽभिसंहितः - इत्याहुः ।

अपरे तु - साक्षादपरोक्षचैतन्यसंसर्गेणैव सुखादेरपरोक्ष्यदर्शनात् अपरोक्षविषये साक्षात्संसर्ग एष्टव्यः । तस्माद्वृत्तेर्विषयसंयोगे वृत्तिरूपावच्छेदकलाभात् तदवच्छेदेन तदुपादानस्य जीवस्यापि संयोगजसंयोगः सम्भवति । कारणाकारणसंयोगात् कार्याकार्यसंयोगवत् कार्याकार्यसंयोगात् कारणाकारणसंयोगस्यापि युक्तितौल्येनाभ्युपगन्तुं युक्तत्वात् - इत्याहुः ।

एकदेशिनस्तु - अन्तःकरणोपहितस्य विषयावभासकचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्तिद्वारा विषयतादात्म्यसम्पादनमेव चिदुपरागोऽभिसंहितः । सर्वगततया सर्वविषयसन्निहितस्यापि जीवस्य तेन रूपेण विषयावभासकत्वे तस्य साधारणतया पुरुषविशेषापरोक्षव्यवस्थित्ययोगेन तस्य अन्तःकरणोपहितत्वरूपेणैव विषयावभासकत्वात् । एवं च विषयापरोक्ष्ये आध्यासिकसम्बन्धो नियामक इति सिद्धान्तोऽपि सङ्गच्छते । न चैवं द्वितीयपक्षसाङ्कर्यम् । जीवस्य सर्वगतत्वे प्रथमःपक्षः, परिच्छिन्नत्वे द्वितीयः, इत्येव तयोर्भेदात् - इत्याहुः ।

**अभेदाभिव्यक्तिवादः**

अथ द्वितीयपक्षे केयमभेदाभिव्यक्तिः ?

केचिदाहुः– कुल्याद्वारा तटाककेदारसलिलयोरिव विषयान्तःकरणावच्छिन्नचैतन्ययोः वृत्तिद्वारा एकीभावोऽभेदाभिव्यक्तिः । एवं च यद्यपि विषयावच्छिन्नं ब्रह्मचैतन्यमेव विषयप्रकाशकम् , तथाऽपि तस्य वृत्तिद्वारा एकीभावेन जीवत्वं सम्पन्नमिति जीवस्य विषयप्रकाशोपपत्तिरिति ।

अन्येत्वाहुः – बिम्बस्थानीयस्य विषयावच्छिन्नस्य ब्रह्मणः प्रतिबिम्बभूतेन जीवेन एकीभावो नाभेदाभिव्यक्तिः । व्यावर्तकोपाधौ दर्पण इव जाग्रति तयोरेकीभावायोगात् , वृत्तिकृताभेदाभिव्यक्त्या विषयावच्छिन्नस्य ब्रह्मणो जीवत्वप्राप्तौ ब्रह्मणस्तदा तद्विषयसंसर्गाभावेन तद्द्रष्टृत्वासम्भवे सति तस्य सर्वज्ञत्वाभावापत्तेश्च । किं तु विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टाया वृत्तेः अग्रभागे विषयप्रकाशकं प्रतिबिम्बं समर्पयतीति तस्य प्रतिबिम्बस्य जीवेनैकीभावः । एवं च अन्तःकरणतद्वृत्तिविषयावच्छिन्नचैतन्यानां प्रमातृप्रमाणप्रमेयभावेन असङ्करोऽप्युपपद्यते । न च वृत्त्युपहितचैतन्यस्य विषयप्रमात्वे तस्य विषयाधिष्ठानचैतन्यस्येव विषयेणाध्यासिकसम्बन्धाभावात् विषयापरोक्ष्ये आध्यासिकसम्बन्धस्तन्त्रं न स्यादिति वाच्यम् , विषयाधिष्ठानचैतन्यस्यैव विषयेणावच्छिन्नस्य वृत्तौ प्रतिबिम्बिततया तदभेदेन तत्सम्बन्धस्यैव तत्सम्बन्धत्वादिति ।

अपरे त्वाहुः - बिम्बभूतविषयाधिष्ठानचैतन्यमेव साक्षादाध्यासिकसम्बन्धलाभात् विषयप्रकाशकमिति तस्यैव बिम्बत्वविशिष्टरूपेण भेदसद्भावेऽपि तदुपलक्षितचैतन्यात्मना एकीभावोऽभेदाभिव्यक्तिः । न चैवं सति जीवब्रह्मसाङ्कर्यम् , न वा ब्रह्मणः सर्वज्ञत्वविरोधः । बिम्बात्मना तस्य यथापूर्वमवस्थानादिति ।

**आवरणाभिभववादः**

अथ तृतीयपक्षे को नामावरणाभिभवः ? अज्ञाननाशश्चेत् , घटज्ञानेनैवाज्ञानमूलः प्रपञ्चो निर्वर्तेत - इति चेत्

अत्र केचिदाहुः – चैतन्यमात्रावारकस्याज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादिप्रकाशेन महान्धकारस्येव ज्ञानेन एकदेशेन नाशो वा, कटवत् संवेष्टनं वा, भीतभटवदपसरणं वाऽभिभव इति ।

अन्ये तु - अज्ञानस्य एकदेशेन नाशे उपादानाभावात् पुनस्तत्र कन्दलनायोगेन सकृदवगते समयान्तरेऽप्यावरणाभावप्रसङ्गात् , निष्क्रियस्यापसरणसंवेष्टनयोरसम्भवाच्च न यथोक्तरूपोऽभिभवः सम्भवति । अतः चैतन्यमात्रावारकस्याप्यज्ञानस्य तत्तदाकारवृत्तिसंसृष्टावस्थविषयावच्छिन्नचैतन्यानावरकत्वस्वाभाव्यमेव अभिभवः । न च विषयावगुण्ठनपटवत् विषयचैतन्यमाश्रित्यस्थितस्याज्ञानस्य कथं तदनावारकत्वं युज्यत इति शङ्क्यम् । 'अहमज्ञः' इति प्रतीत्या अहमनुभवे प्रकाशमानचैतन्यमाश्रयत एव तस्य तदनावारकत्वसम्प्रतिपत्तेः– इत्याहुः ।

अपरे तु – 'घटं न जानामि' - इति घटज्ञानविरोधित्वेन, घटज्ञाने सति 'घटाज्ञानं निवृत्तम्' इति तन्निवर्त्यत्वेन च अनुभूयमानं न मूलाज्ञानम् । शुद्धचैतन्यविषयस्य तज्ज्ञाननिवर्त्यस्य च तस्य तथात्वायोगात् । किन्तु घटावच्छिन्नचैतन्यविषयं मूलाज्ञानस्यावस्थाभेदरूपमज्ञानान्तरमिति तन्नाश एवाभिभवः । न चैवमेकेन ज्ञानेन तन्नाशे तत्समानविषयाणां ज्ञानान्तराणाम् आवरणानाम् आवरणानभिभावकत्वापत्तिः । यावन्ति ज्ञानानि, तावन्ति तन्निवर्त्यानि अज्ञानानि इत्यभ्युपगमात् – इत्याहुः ।

**अवस्थाज्ञानसादित्वानादित्ववादः**

इमानि च अवस्थारूपाणि अज्ञानानि मूलाज्ञानवदज्ञानत्वात् अनादीनीति केचित् ।

व्यावहारिकौ जगज्जीवावावृत्य स्वाप्नौ जगज्जीवौ विक्षिपन्ती निद्रा तावत् आवरणविक्षेपशक्तियोगात् , अज्ञानावस्थाभेदरूपा । तथा निद्रासुषुत्यवस्थाऽपि अन्तःकरणादौ विलीने 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति परामर्शदर्शनात् मूलाज्ञानवत् सुषुप्तिकालेऽनुभूयमाना अज्ञानावस्था भेदरूपैव । तयोश्च जाग्रद्भोगप्रदकर्मोपरमे सत्येवोद्भवात् सादित्वमिति, तद्वत् अन्यदप्यज्ञानमवस्थारूपं सादि इति अन्ये ।

**अवस्थाज्ञानानादित्वपक्षपरिष्कारः**

ननु - अनादित्वपक्षे घटे प्रथममुत्पन्नेनैव ज्ञानेन सर्वतदज्ञाननाशो भवेत् , विनिगमनाविरहात् , तदवच्छिन्नचैतन्यावरकसर्वाज्ञानानाशे विषयप्रकाशायोगाच्च ।अतः पाश्चात्यज्ञानानाम् आवरणानभिभावकत्वं तदवस्थमेवेति चेत् –

अत्र केचित् आहुः– यथा ज्ञानप्रागभावानामनेकेषां सत्त्वेऽप्येकज्ञानोदये 'एक एव प्रागभावो निवर्तते, संशयादिजननशक्ततया तदावरणरूपेषु प्रागभावान्तरेषु सत्स्वपि विषयावभासः; तथा एकज्ञानोदये एकमेवाज्ञानं निवर्तते, अज्ञानान्तरेषु सत्स्वपि विषयावभासः- इति ।

अन्येतु – आवृतस्यापरोक्षज्ञानं विरुद्धम् , एकज्ञानोदये च प्रागभावान्तरसत्त्वेऽपि यावद्विशेषदर्शनाभावकूटरूपमावरणं विशेषदर्शनान्नास्तीति मन्यमाना वदन्ति – यदा यदज्ञानमावृणोति तदा तेन ज्ञानेन तस्यैव नाशः । सर्वं च सर्वदा नावृणोति , वैयर्थ्यात् । किं तु आवरकाज्ञाने वृत्त्या नाशिते तद्वृत्त्युपरमे अज्ञानान्तरमावृणोति । न चैवं सति ब्रह्मावगमोत्पत्तिकालेऽनावारकत्वेन स्थितानामज्ञानानां ततोऽप्यनिवृत्तिप्रसङ्गः । तेषां साक्षात्तद्विरोधित्वाभावेऽपि तन्निवर्त्यमूलाज्ञानपरतन्त्रतया अज्ञानसम्बन्धादिवत् तन्निवृत्त्यैव निवृत्त्युपपत्तेः । एतदर्थमेव तेषां तदवस्थाभेदरूपतया तत्पारतन्त्र्यमिष्यते – इति ।

अपरे तु ‘अज्ञानस्य सविषयस्वभावत्वात् उत्सर्गतः सर्वं सर्वदा आवृणोत्येव । न च विषयोत्पत्तेः प्रागावरणीयाभावेन आवारकत्वं न युज्यत इति वाच्यम् , तदापि सूक्ष्मरूपेण तत्सत्त्वात्’ इति मन्यमानाः कल्पयन्ति– यथा बहुजनसमाकुले प्रदेशे कस्यचित् शिरसि निपतन्नशनिः इतरानप्यपसारयति, यथा वा सन्निपातहरमौषधम् एकं दोषं निवर्तयद्दोषान्तरमपि दूरीकरोति, एवमेकमज्ञानं नाशयत् ज्ञानम् अज्ञानान्तराण्यपि तिरस्करोति । तिरस्कारश्च यावत् ज्ञानस्थितिः तावत् आवरणशक्तिप्रतिबन्धः – इति ।

## ‘ज्ञानसामान्यम् अज्ञाननिवर्तकम्’ इति नियमपरीक्षा

नन्वेवं सति धारावाहिकस्थले द्वितीयादिवृत्तीनामावरणानभिभावकत्वेन वैफल्यं स्यात् , प्रथमज्ञानेनैव निवर्तनतिरस्काराभ्यामावरणमात्रस्याभिभावादिति –

अत्राहुः– वृत्तितिरस्कृतमज्ञानं तदुपरमे पुनरावृणोति प्रदीपतिरस्कृतं तम इव प्रदीपोपरमे । वृत्त्युपरमसमये वृत्त्यन्तरोदये तु तिरस्कृतमज्ञानं तथैवावतिष्ठते प्रदीपोपरमसमये प्रदीपान्तरोदये तम इव । तथा च ‘यस्मिन् सति अग्रिमक्षणे यस्य सत्त्वं, यद्व्यतिरेके चासत्त्वं, तत्तज्जन्यम्’ इति प्रागभावपरिपालनसाधारणलक्षणानुरोधेन अनावरणस्य द्वितीयादिवृत्तिकार्यत्वस्यापि लाभात् न तद्वैफल्यमिति ।

न्यायचन्द्रिकाकृतस्तु आहुः – केनचिज्ज्ञानेन कस्यचिदज्ञानस्य नाश एव, न तु आवारकाणामप्यज्ञानान्तराणां तिरस्कारः । तथा च धारावाहिकद्वितीयादिवृत्तीनामपि एकैकाज्ञाननाशकत्वेन साफल्यम् । न चैवं ज्ञानोदयेऽप्यावरणसम्भवाद्विषयानवभासप्रसङ्गः । अवस्थारूपाण्यज्ञानानि हि तत्तत्कालोपलक्षितस्वरूपावारकाणि, ज्ञानानि च यावत्स्वकालोपलक्षितविषयावारकाज्ञाननाशकानि । तथा च किञ्चज्ज्ञानोदये तत्कलीनविषयावाराकाज्ञानस्य नाशात् विद्यमानानामज्ञानान्तराणामन्यकालीनविषयावारकत्वाच्च न तत्कालीनविषयावभासे काचिदनुपपत्तिः । कारीरीफले वृष्टौ आसन्नसमयस्येव अज्ञानविषये घटादौ तत्तत्कालस्य उपलक्षणतया विषयकोटावननुप्रवेशेन सूक्ष्मतत्तत्कालभेदाविषयैर्धारावाहिकद्वितीयादिज्ञानैरज्ञानानां निवृत्तावपि न काचिदनुपपत्तिरिति ।

केचित्तु – प्रथमज्ञाननिवर्त्यमेवाज्ञानं स्वरूपावारकम् । द्वितीयादिज्ञाननिवर्त्यानि तु देशकालादिविशेषणान्तरविशिष्टविषयाणि । अत एव सत्तानिश्चयरूपे अज्ञाननीवर्तके चैत्रदर्शने सकृज्जाते ‘चैत्रं न जानामि’ इति स्वरूपावरणं नानुभूयते, किं तु ‘इदनीं स कुत्रेति न जानामि’ इत्यादिरूपेण विशिष्टावरणमेव । विस्मरणशालिनः क्वचित् सकृत् दृष्टेऽपि ‘न जानामि’ इति स्वरूपावरणं दृश्यते चेत् ,तत्र तथाऽस्तु । अन्यत्र सकृद्दृष्टे विशिष्टविषयान्येवाज्ञानानि ज्ञानानि च । न च - एवं सति धारावाहिकद्वितीयादिज्ञानानामज्ञाननिवर्तकत्वं न स्यात् ।

स्थूलकालविशिष्टाज्ञानस्य प्रथमज्ञानेनैव निवृत्तेः, पूर्वापरज्ञानव्यावृत्तसूक्ष्मकालविशिष्टाज्ञानस्य तदविषयैर्द्वितीयादिज्ञानैर्निवृत्त्ययोगात् – इति वाच्यम् । धारावहनस्थले प्रथमोत्पन्नाया एव वृत्तेस्तावत्कालावस्थायित्वसम्भवेन वृत्तिभेदानभ्युपगमात् । तदभ्युपगमेऽपि बहुकालावस्थायिपञ्चषवृत्तिरूपत्वसम्भवेन परस्परव्यावृत्तस्थूलकालादिविशेषणभेदविषयत्वोपपत्तेः । प्रतिक्षणोद्यदनेकवृत्तिसन्तानरूपत्वाभ्युपगमेऽपि द्वितीयादिवृत्तीनामधिगतार्थमात्रविषयतया प्रामाण्याभावेन आवरणानिवर्तकत्वेऽप्यहानेश्च । न हि विषयाबाधमात्रं प्रामाण्यम् । प्रागवगतानवगतयोः पर्वतत्तद्वृत्तिपावकयोरनुमितिविषययोरबाधस्याविशेषेण उभयत्राप्यनुमितेः प्रामाण्यप्रसङ्गात् । न चेष्टापत्तिः । 'वह्नावनुमितिः प्रमाणण्' इतिवत् 'पर्वतेऽप्यनुमितिः प्रमाणम्' इतिव्यवहारादर्शनात् , विवरणे साक्षिसिद्धस्याज्ञानस्य अभावव्यावृत्तिप्रत्यायनार्थानुमानादिविषयत्वेऽपि प्रमाणावेद्यत्वोक्तेश्च । तस्मात् द्वितीयादिवृत्तीनां प्रामाण्याभावात् उपासनादिवृत्तीनामिव अज्ञानानिवर्तकत्वेऽपि न हानिः । प्रमाणवृत्तीनामेव तन्निवर्तकत्वाभ्युपगमात् ।

### 'प्रमासामान्यम् अज्ञाननिवर्तकम्' इति नियमपरीक्षा

ननु - नायमपि नियमः, परोक्षवृत्तेरनिर्गमेनाज्ञानानिवर्तकत्वादिति चेत् –

अत्र केचिदाहुः – द्विविधं विषयावारकमज्ञानम् । एकं विषयाश्रितं रज्वादिविक्षेपोपादानभूतं कार्यकल्प्यम् । अन्यत् पुरुषाश्रितं 'इदमहं न जनामि' इत्यनुभूयमानम् । पुरुषाश्रितस्य विषयसम्भिन्नविक्षेपोपादानत्वासम्भवेन विषयाश्रितस्य 'इदमहं न जानामि' इति साक्षिरूपप्रकाशसंसर्गायोगेन द्विविधस्याप्यावश्यकत्वात् । एवं च परोक्षस्थले वृत्तेर्निर्गमनाभावात् दूरस्थवृक्षे आप्तवाक्यात् परिमाणविशेषावगमेऽपि तद्विपरीतपरिमाणविक्षेपविशेषदर्शनाच्च विषयगताज्ञानानिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येव । "शास्त्रार्थं न जानामि" इत्यनुभूताज्ञानस्य तदुपदेशानन्तरं निवृत्त्यनुभवात् । अत एव 'अनुमेयादौ सुषुप्तिव्यावृत्तिः' इति विवरणस्य 'तद्विषयाज्ञाननिवृत्तिरर्थः' इत्युक्तं तत्त्वदीपने इति ।

अन्ये तु – नयनपटलवत् पुरुषाश्रितमेवाज्ञानं विषयावारकम् , न तदतिरेकेण विषयगताज्ञाने प्रमाणमस्ति । न च – पुरुषाश्रितस्य विषयगतविक्षेपपरिणामित्वं न सम्भवति, तत्सम्भवे वा दूरस्थवृक्षपरिमाणे परोक्षज्ञानादज्ञाननिवृत्तौ विपरीतपरिमाणविक्षेपो न सम्भवतीति – वाच्यम् । वाचस्पतिमते सर्वस्य प्रपञ्चस्य जीवाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वेन तद्वत् शुक्तिरजतादेः पुरुषाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वोपपत्तेः, परोक्षवृत्त्या एकावस्थानिवृत्तावपि अवस्थान्तरेण विपरीतपरिमाणविक्षेपोपपत्तेश्च – इत्याहुः ।

अपरे तु – शुक्तिरजतादिपरिणामोपपत्त्याञ्जस्यात् विषयावकुण्ठनपटवत् विषयगतमेवाज्ञानं तदावारकम् । न च तथासति अज्ञानस्य अन्तःकरणोपहितसाक्ष्यसंसर्गेण ततः प्रकाशानुपपत्तिः परोक्षवृत्तिनिवर्त्यत्वासम्भवश्च दोष इति वाच्यम् । अवस्थारूपाज्ञानस्य साक्ष्यसंसर्गेऽपि तत्संसृष्टमूलाज्ञानस्यैव 'शुक्तिमहं न जानामि' इति प्रकाशोपपत्तेः, शुक्त्यादेरपि मूलाज्ञानविषयचैतन्याभिन्नतया तद्विषयत्वानुभवाविरोधात् । विवरणादिषु मूलाज्ञानसाधनप्रसङ्ग एव 'इदमहं न जानामि' इति प्रत्यक्षप्रमाणोपदर्शनाच्च । 'अहमज्ञः' इति सामान्यतोऽज्ञानानुभव एव मूलाज्ञानविषयकः, 'शुक्तिमहं न जानामि' इत्यादिविषयविशेषालिङ्गिताज्ञानानुभवस्त्ववस्थाऽज्ञानविषयकः' इति विशेषाभ्युपगमेऽपि अवस्थाऽवस्थावतोरभेदेन मूलाज्ञानस्य साक्षिसंसर्गाद्वा साक्षिविषयचैतन्ययोः वास्तवैक्याद्वा विषयगतस्याप्यवस्थाऽज्ञानस्य साक्षिविषयत्वोपपत्तेः । परोक्षज्ञानस्याज्ञानानिवर्तकत्वेऽपि ततस्तन्निवृत्त्यनुभवस्य सत्तानिश्चयरूपपरोक्षवृत्तिप्रतिबन्धकप्रयुक्ताननुभवनिबन्धनभ्रान्तित्वोपपत्तेः, अपरोक्षज्ञानस्यैवाज्ञाननिवर्तकत्वनियमाभ्युपगमात् – इत्याहुः ।

ननु नायमपि नियमः । अविद्याऽहङ्कारसुखदुःखादितद्धर्मप्रत्यक्षस्याज्ञाननिवर्तकत्वानभ्युपगमादिति चेत् – न – अविद्यादिप्रत्यक्षस्य साक्षिरूपत्वेन वृत्तिरूपापरोक्षज्ञानस्यावरणनिवर्तकत्वनियमानपायात् ।

**साक्षिस्वरूपनिर्णयवादः**

अथ कोऽयं साक्षी जीवातिरेकेण व्यवह्रियते ।

अत्रोक्तं कूटस्थदीपे – देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणात् निर्विकारत्वाच्च साक्षीत्युच्यते । लोकेऽपि हि औदासीन्यबोधाभ्यामेव साक्षित्वं प्रसिद्धम् । यद्यपि जीवस्य वृत्तयः सन्ति देहद्वयभासिकाः, तथापि सर्वतः प्रसृतेन स्वावच्छिन्नेन कूटस्थचैतन्येन ईषत् सदा भास्यमानमेव देहद्वयं जीवचैतन्यरूपप्रतिबिम्बगर्भादन्तःकरणाद्विच्छिद्यविच्छिद्योद्गच्छद्भिर्वृत्तिज्ञानैः स्फुटम् अवभास्यते । अन्तरालकालेषु तु सह वृत्त्यभावैः कूटस्थचैतन्येनैव अवभास्यते । अत एव अहङ्कारादीनां [सदा](सर्वदा) प्रकाशसंसर्गात् संशयाद्यगोचरत्वम् अन्यज्ञानधाराकालीनाहङ्कारस्य 'एतावन्तं कालमिदमहं पश्यन्नेवासम्' इत्यनुसन्धानं च । न च कूटस्थप्रकाशिते कथं जीवस्य व्यवहारस्मृत्यादिकमिति शङ्क्यम् । अन्योन्याध्यासेन जीवैकत्वापत्त्या कूटस्थस्य जीवान्तरङ्गत्वात् । न च जीवचैतन्यमेव साक्षी भवतु किं कूटस्थेनेति वाच्यम् । लौकिकवैदिकव्यवहारकर्तुस्तस्य उदासीनद्रष्टृत्वासम्भवेन 'साक्षी चेता केवलो निर्गुणश्च' (श्वे.उ. ६ । ११) इति श्रुत्युक्तसाक्षित्वायोगात् । 'तयोरन्यः

पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति' (श्वे.उ. ४ । ६) इति कर्मफलभोक्तुर्जीवात् उदासीनप्रकाशरूपस्य साक्षिणः पृथगाम्नानाच्च इति ।

नाटकदीपेऽपि नृत्यशालास्थदीपदृष्टान्तेन साक्षी जीवाद्विविच्य दर्शितः । तथाहि – 'नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम् । दीपयेदविशेषेण तदभावेऽपि दीप्यते ॥' (पं.द. १० । ११) । तथा चिदाभासविशिष्टाहङ्काररूपं जीवं विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात् नृत्याभिमानिप्रभुतुल्यं तत्परिसरवर्तित्वेऽपि तद्राहित्यात् सभ्यपुरुषतुल्यान् विषयान् नानाविधविकारवत्त्वात् नर्तकीतुल्यां धियं च दीपयन् सुषुप्त्यादावहङ्काराद्यभावेऽपि दीप्यमानः चिदाभासविशिष्टाहङ्काररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षीति ।

एवं जीवाद्विवेचितोऽयं साक्षी न ब्रह्मकोटिरपि, किं त्वस्पृष्टजीवेश्वरविभागं चैतन्यम् , इत्युक्तं कूटस्थदीपे ।

तत्त्वप्रदीपिकायामपि मायाशबलिते सगुणे परमेश्वरे 'केवलो निर्गुणः' इति विशेषणानुपपत्तेः सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षीति प्रतिपद्यते इत्युदितम् ।

कौमुद्यां तु 'एको देवः सर्वभूतेषु गूढःसर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥' (श्वे.उ. ६ । ११) इति देवत्वादिश्रुतेः परमेश्वरस्यैव रूपभेदः कश्चित् जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीनः साक्षी नाम । स च कारणत्वादिधर्मानास्पदत्वात् अपरोक्षो जीवगतमज्ञानाद्यवभासयंश्च जीवस्यान्तरङ्गः । सुषुप्त्यादौ च कार्यकरणोपरमे जीवगताज्ञानमात्रस्य व्यञ्जकः प्राज्ञशब्दितः । 'तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' (बृ.उ. ४ । ३ । २१) 'प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति' (बृ.उ. ४ । ३ । ३५) इति श्रुतिवाक्याभ्यां सुषुप्त्युत्क्रान्त्यवस्थयोर्जीवाद्भेदेन प्रतिपादितः परमेश्वर इति सुषुप्त्युत्क्रान्त्यधिकरणे निर्णयोऽपि साक्षिपरः इत्युपवर्णितम् ।

तत्त्वशुद्धावपि 'यथा इदं रजतमिति भ्रमस्थले वस्तुतः शुक्तिकोट्यन्तर्गतोऽपीदमंशः प्रतिभासतो रजतकोटिः तथा ब्रह्मकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति जीवस्य सुखादिव्यवहारे तस्योपयोगः' इत्युक्त्या अयमेव पक्षः समर्थितः ।

केचित्तु - अविद्योपाधिको जीव एव साक्षाद्द्रष्टृत्वात्साक्षी । लोकेऽपि ह्यकर्तृत्वे सति द्रष्टृत्वं साक्षित्वं प्रसिद्धम् । तच्चासङ्गोदासीनप्रकाशरूपे जीवे एव साक्षात्सम्भवति । जीवस्यान्तःकरणतादात्म्यापत्त्या कर्तृत्वाद्यारोपभाक्त्वेऽपि स्वयमुदासीनत्वात् । 'एको देवः' इति मन्त्रस्तु ब्रह्मणो जीवभावाभिप्रयेण साक्षित्वप्रतिपादकः । 'द्वा सुपर्णा' इति

(मु.उ. ३ । १ । १) मन्त्रः गुहाधिकरणन्यायेन जीवेश्वरोभयपरः गुहाधिकरणभाष्योदाहृतपैङ्गिरहस्यब्राह्मणव्याख्यातेन प्रकारेण जीवान्तःकरणोभयपरो वा, इति न कश्चिद्विरोधः इत्याहुः ।

अन्ये तु - सत्यं जीव एव साक्षी, न तु सर्वगतेन अविद्योपहितेन रूपेण । पुरुषान्तरान्तःकरणादीनामपि पुरुषान्तरं प्रति स्वान्तःकरणभासकसाक्षिसंसर्गाविशेषेण प्रत्यक्षत्वापत्तेः । न चान्तःकरणभेदेन प्रमातृभेदात्तदनापत्तिः । साक्षिभास्येऽन्तःकरणादौ सर्वत्र साक्ष्यभेदे सति प्रमातृभेदस्याप्रयोजकत्वात् । तस्मादन्तःकरणोपधानेन जीवः साक्षी । तथा च प्रतिपुरुषं साक्षिभेदात् पुरुषान्तरान्तःकरणादेः पुरुषान्तरसाक्ष्यसंसर्गाद्वा तदयोग्यत्वाद्वा अप्रकाश उपपद्यते । सुषुप्तावपि सूक्ष्मरूपेणान्तःकरणसद्भावात् तदुपहितः साक्षी तदाप्यस्त्येव । न च – अन्तःकरणोपहितस्य प्रमातृत्वेन न तस्य साक्षित्वम् , सुषुप्तौ प्रमात्रभावेऽपि साक्षिसत्त्वेन तयोर्भेदश्च अवश्यं वक्तव्यः - इति वाच्यम् । विशेषणोपाध्योर्भेदस्य सिद्धान्तसम्मतत्वेन अन्तःकरणविशिष्टः प्रमाता तदुपहितः साक्षी इति भेदोपपत्तेः इत्याहुः ।

**साक्षिचैतन्यस्य आवृतत्वानावृतत्वविचारः**

ननु -उक्तरूपस्य साक्षिणःचैतन्यमात्रावारकेणाज्ञानेनावरणमवर्जनीयमिति कथमावृतेनाविद्याहङ्कारादिभानं - इति चेत् –

राहुवदविद्या स्वावृतप्रकाशप्रकाश्येति केचित् ।

वस्तुतः अविद्यान्तःकरणतद्धर्मावभासकं साक्षिचैतन्यं विहायैव अज्ञानं चैतन्यमावृणोतीति अनुभवानुसारेण कल्पनात् न कश्चिद्दोषः । अत एव सर्वदा तेषाम् अनावृतप्रकाशसंसर्गात् अज्ञानविपरीतज्ञानसंशयागोचरत्वम् ।

साक्ष्यानन्दस्यानावृतत्वविचारः

साक्षिचैतन्यस्यानावृतत्वे तत्स्वरूपभूतस्यानन्दस्यापि प्रकाशापत्तिरिति चेत् , न – इष्टापत्तेः, आनन्दरूपप्रकाशप्रयुक्तस्य आत्मनि निरुपाधिकप्रेम्णो दर्शनात् , 'भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्' इति विवराणाच्च ।

स्यादेतत् – इदानीमप्यानन्दप्रकाशे मुक्तिसंसारयोरविशेषप्रसङ्गः । ननु कल्पितभेदस्य साक्ष्यानन्दस्य प्रकाशेऽपि अनवच्छिन्नस्य ब्रह्मानन्दस्यावृतस्य संसारदशायामप्रकाशेन विशेषोऽस्तीति चेत् , न–आनन्देऽनवच्छेदांशस्यापुरुषार्थत्वात् , आनन्दपरोक्षमात्रस्य च इदानीमपि सत्त्वात् । ननु–अवच्छिन्नः साक्ष्यानान्दः सातिशयः, सुषुप्तिसाधारणादनतिस्पष्टात्ततो वैषयिकानन्देष्वतिशयानुभावात् । अनवच्छिन्नो ब्रह्मानन्दस्तु निरतिशयः । आनन्दवल्ल्यां मानुषानन्दाद्युत्तरोत्तरशतगुणोत्कर्षोपवर्णनस्य ब्रह्मानन्दे समापनात्– इति चेत् , न–सिद्धान्ते

साक्ष्यानन्दविषयानन्दब्रह्मानन्दानां वस्तुत एकत्वेन उत्कर्षापकर्षासम्भवात् । मानुषानन्दादीनामुत्तरोत्तरमुत्कर्षं श्रुतिर्वदतीति चेत् , को वा ब्रूते श्रुतिर्न वदतीति, किं तु अद्वैतवादे तदुपपादनमशक्यमित्युच्यते । नन्वेकस्यैव सौरालोकस्य करतलस्फटिकदर्पणाद्यभिव्यञ्जकविशेषोपधानेनाभिव्यक्तितारतम्यदर्शनात् एकत्वेऽप्यानन्दस्य अभिव्यञ्जकसुखवृत्तिभेदोपधानेनाभिव्यक्तितारतम्यरूपमुत्कर्षापकर्षवत्त्वं युक्तमिति चेत् , न - दृष्टान्तासम्प्रतिपत्तेः । सर्वतः प्रसृमरस्य सौरालोकस्य गगने विना करतलादिसम्बन्धम् अस्पष्टं प्रकाशमानस्य निम्नतले प्रसृमरस्य जलस्येव करतलसम्बन्धेन गतिप्रतिहतौ बहुलीभावादधिकप्रकाशः, भास्वरदर्पणादिसम्बन्धेन गतिप्रतिहतौ बहुलीभावात्तदीयदीप्तिसंवलनाच्च ततोऽप्यधिकप्रकाशः, इति तत्राभिव्यञ्जकोपाधिकाभिव्यक्तितारतम्यानभ्युपगमात् । दृष्टान्तसम्प्रतिपत्तौ च गगनप्रसृतसौरालोकवत् अनवच्छिन्नानन्दस्यास्पष्टता, करतलाद्यवच्छिन्नसौरालोकवत् सुखवृत्त्यवच्छिन्नानन्दस्याधिकाभिव्यक्तिरिति मुक्तितः संसारस्यैव अभ्यर्हितत्वोपपत्तेश्च । एतेन संसारदशायां प्रकाशमानोऽप्यानन्दो मिथ्याज्ञानतत्संस्कारविक्षिप्ततया तीव्रवायुविक्षिप्तप्रदीपप्रभावदस्पष्टं प्रकाशते, मुक्तौ तदभावात् यथावदवभासते इत्यपि – निरस्तम् । निर्विशेषस्वरूपानन्दे प्रकाशमाने तत्र विक्षेपदोषादप्रकाशमानस्य मुक्त्यन्वयिनोऽतिशयस्य असम्भवात् । तस्मात् साक्ष्यानन्दस्यानावृतत्वकल्पनमयुक्तम् ।

अत्राहुः अद्वैतविद्याचार्याः - यथा अत्युत्कृष्टस्य एकस्यैव धवलरूपस्य मालिन्यतारतम्ययुक्तेषु अनेकेषु दर्पणेषु प्रतिबिम्बे सति उपाधिमालिन्यतारतम्यात् तत्र तत्र प्रतिबिम्बे धावल्यापकर्षः तारतम्येनाध्यस्यते, एवं वस्तुतो निरतिशयस्य एकस्यैव स्वरूपानन्दस्य अन्तःकरणप्रतिबिम्बिततया साक्ष्यानन्दभावे प्राक्तनसुकृतसम्पत्त्यधीनविषयविशेषसम्पर्कप्रयुक्तसत्वोत्कर्षापकर्षरूपशुद्धितारतम्ययुक्तसुखरूपान्तःकरणवृत्तिप्रतिबिम्बिततया विषयानन्दभावे च तमोगुणरूपोपाधिमालिन्यतारतम्यदोषात् अपकर्षः तारतम्येनाध्यस्यते इति संसारदशायां प्रकाशमानेऽप्यानन्दे अध्यस्तापकर्षतारतम्येन सातिशयत्वादतृप्तिः ।विद्योदये निखिलापकर्षाध्यासनिवृत्तेः अरोपितसातिशयत्वापायात् कृतकृत्यता, इति विशेषोपपत्तेः निरुपाधिकप्रेमगोचरतया प्रकाशमानः साक्ष्यानन्दोऽनावृत एवेति ।

अन्ये तु -प्रकाशमानोऽप्यानान्दः 'मयि नास्ति न प्रकाशते' इत्यावरणानुभवात् आवृत एव । एकस्मिन्नपि साक्षिणि अविद्याकल्पितरूपभेदसम्भवेन चैतन्यरूपेणानावरणस्य आनन्दरूपेणावरणस्य चाविरोधात् , स्वरूपप्रकाशस्यावरणानिवर्तकतया प्रकाशमाने आवरणस्याविरोधाच्च, 'त्वदुक्तमर्थं न जानामि' इति प्रकाशमान एवावरणदर्शनाच्च । न च तत्र अनावृतसामान्याकारावच्छेदेन विशेषावरणमेवानुभूयत इति वाच्यम् ।

अन्यावरणस्यान्यावच्छेदेन भानेऽतिप्रसङ्गात् । न च सामान्यविशेषभावो नियामक इति नातिप्रसङ्ग इति वाच्यम् । व्याप्यव्यापकभावातिरिक्तसामान्यविशेषभावाभावेन 'वह्निं न जानामि' इति धूमावारकाज्ञानानुभव प्रसङ्गात् । तस्मात् यदवच्छिन्नमज्ञानं प्रकाशते तदेवावृतमिति प्रकाशमानेऽप्यज्ञानं युज्यते । अज्ञानं च यथा साक्ष्यंशं विहाय चैतन्यमावृणोति, एवमानन्दमपि तत्तत्सुखरूपवृत्तिकबलीकृतं विहायैवावृणोति । स एव वैषयिकानन्दस्यावरणाभवः । स चावरणाभिभवः प्रत्यूषसमये बाह्यावरणाभिभववत् कारणविशेषप्रयुक्तवृत्तिविशेषवशात् तरतमभावेन भवति । अतः स्वरूपानन्दविषयानन्दयोः विषयानन्दानां च परस्परं भेदसिद्धिः – इति वदन्ति ।

सर्वथाऽपि साक्षिचैतन्यस्यानावृतत्वेन आवरणाभिभवार्थं वृत्तिमनपेक्ष्यैव तेन अहङ्कारादिप्रकाशनमिति तुल्यमेव ।

### केवलसाक्षिभास्यानां स्मरणोपपत्तिनिरूपणम्

नन्वेवं कथमहङ्कारादीनामनुसन्धानम् । ज्ञानसूक्ष्मावस्थारूपस्य संस्कारस्य ज्ञाने सत्ययोगेन नित्येन साक्षिणा तदाधानासम्भवात् ।

अत्र केचिदाहुः- स्वसंसृष्टेन साक्षिणा सदा भास्यमानोऽहङ्कारः तत्तद्घटादिविषयवृत्त्याकारपरिणतस्वावच्छिन्नेनापि साक्षिणा भास्यत इति तस्यानित्यत्वात् सम्भवति संस्काराधानं घटादौ विषय इव । न हि स्वाकारवृत्त्यवच्छिन्नसाक्षिणैव स्वगोचरसंस्काराधानमिति नियमोऽस्ति । तथा सति वृत्तिगोचरसंस्कारासम्भवेन वृत्तेरस्मरणप्रसङ्गात् । अनवस्थापत्त्या वृत्तिगोचरवृत्त्यन्तरस्य अनुव्यवसायनिरसनेन निरस्तत्वात् । किं तु यद्वृत्त्यवच्छिन्नचैतन्ये यत् प्रकाशते तद्वृत्त्या तद्गोचरसंस्काराधानम् इत्येव नियमः । एवं च ज्ञानसुखादयोऽपि अन्तःकरणवृत्तयः तप्तायःपिण्डाद्युच्चरन्तो विस्फुलिङ्गाः स्वावच्छिन्नेन वह्निनेव स्वस्वावच्छिन्नेन अनित्येन साक्षिणा भास्यन्त इति युक्तं तेष्वपि संस्काराधानम् । यस्तु 'घटैकाकारधीस्था चित् घटमेवावभासयेत् । घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते ॥ (पं.द. ८ । ४) इति कूटस्थदीपोक्तः विषयविशेषणस्य ज्ञानस्य विषयावच्छिन्नब्रह्मचैतन्यावभास्यत्वपक्षः,यश्च तत्त्वप्रदीपिकोक्तो ज्ञानेच्छादीनामनवच्छिन्नशुद्धचैतन्यरूपनित्यसाक्षिभास्यत्वपक्षः, तयोरपि चैतन्यस्य स्वसंसृष्टापरोक्षरूपत्वात् वृत्तिसंसर्गोऽवश्यं वाच्य इति तत्संसृष्टानित्यरूपसद्भावात् न तेषु संस्काराधाने काचिदनुपपत्तिरिति ।

अन्ये तु - सुषुप्तावपि अविद्याद्यनुसन्धान सिद्धये कल्पिताम् अविद्यावृत्तिम् अहमाकारामङ्गीकृत्य अहमर्थे संस्कारमुपपादयन्ति । न चास्मिन् पक्षे 'एतावन्तं कालमिदमहं पश्यन्नेवासम्' इति

अन्यज्ञानधाराकालीनाहमर्थानुसन्धानानुपपत्तिः।अवच्छेदकभेदेन सुखदुःखयौगपद्यवद्वृत्तिद्वययौगपद्यस्या- प्यविरोधेन अन्यज्ञानधाराकालेऽपि अहमाकाराविद्यावृत्तिसन्तानसम्भवादिति ।

अपरे तु - अहमाकारा वृत्तिरन्तःकरणवृत्तिरेव । किं तु उपासनादिवृत्तिवत् न ज्ञानम् , क्लृप्ततत्करणाजन्यत्वात् । न हि तत्र चक्षुरादिप्रत्यक्षप्रमाणं सम्भवति । न वा लिङ्गादिकम् । लिङ्गादिप्रतिसन्धानशून्यस्याप्यहङ्कारानुसन्धानदर्शनात् । नापि मनः करणम् । तस्योपादानभूतस्य क्वचिदपि करणत्वाक्लृप्तेः । तर्हि अहमर्थप्रत्यभिज्ञाऽपि ज्ञानं न स्यादिति चेत् , न - तस्या अहमंशे ज्ञानत्वाभावेऽपि तत्तांशे स्मृतिकरणत्वेन क्लृप्तसंस्कारजन्यतया ज्ञानत्वात् , अंशभेदेन ज्ञाने परोक्षत्वापरोक्षत्ववत् प्रमात्वाप्रमात्ववच्च ज्ञानत्वाज्ञानत्वयोरपि अविरोधात् - इत्याहुः ।

इतरे तु - अहमाकाराऽपि वृत्तिर्ज्ञानमेव । 'मामहं जानामि' इत्यनुभवात् । न च करणासम्भवः । अनुभवानुसारेण मनस एवान्तरिन्द्रियत्वस्येव करणत्वस्यापि कल्पनात् - इत्याहुः ।

एवं सति बाह्यगोचरापरोक्षवृत्तीनामेव आवरणाभिभावकत्वनियमः पर्यवसन्नः ।